कृत्वा हुंकारेण विसर्जयेत् इत्यभ्यासक्रिया कार्या धन्विना सिद्धिमिच्छता षण्मासात्सिध्यते मुष्टिः शराः संवत्सरेण तु नाराचास्तस्य सिध्यंति यस्य तुष्टो महेश्वरः ७ पुष्पवद्धारयेद्वाणं सर्पश्चैव तु पीडयेद्धनुः धनवच्चिंतयेल्लक्ष्यं यदीच्छेत्सिद्धिमात्मनः ८ क्रियामिच्छंति आचार्या दूरमिच्छंति भार्गवाः राजानो दृढमिच्छंति लक्ष्यमिच्छंति चेतराः ९ जनानां रंजनं येन लक्ष्यघातात्प्रजायते हीनेनापी गुणेन तस्मात्प्रशस्तं लक्ष्यवेधनं १० अथ लक्ष्यस्खलनविधिः विशाखस्य केस्थित्वा समसंधानमाचरेत् गोपुच्छमुखवामेन सिंहकर्णी च मुष्टिना आकर्षे कौशिकव्यायेन शिखां चालयेत्ततः १ पूर्वापरौ समौ कार्यौ समांशौ निश्चलौ करौ चक्षुषी स्पंदयेन्नैव दृष्टिं लक्ष्ये नियोजयेत् २ मुष्टिनाच्छादितं लक्ष्यं शरस्याग्रे नियोजयेत् मनो दृष्टिगतं ज्ञात्वा ततः कांडं विसर्जयेत् स्खलत्येवं कदाचिन्न लक्ष्ये योधो जितश्रमः ३ अथ शीघ्रसंधानं आदानं चैव तूणीरात्संधानं कर्षणं तथा क्षेपणं च त्वरायुक्तो बाणस्य कुरुते तु यः १ नित्याभ्यासवशात्तस्य शीघ्रसंधानताभ

शां
३०

30

50

अथ दृढभेदिता प्रत्या
भवेत् २ अथ दूरपातित्वं मुष्ट्यापातात्कथ्यावाणं स्त्रीचिह्ने दूरयाननं २ अथ दृढभेदिता प्रत्या
लीढकृतस्थाने अधः संधानमाचरेत् दर्दुरस्थानमास्थाय ऊर्द्ध्वधारणमाचरेत् १ स्कंधव्यायेन
नवत्रस्यमुष्ट्यापुंमार्गणेनच अत्यंतसौष्ठवाद्धि जायते दृढभेदिता २ अथ हीनगतयः सूची
मुखामीनपुच्छाभ्रमरीचतृतीयका शराणांगतयस्तिस्त्रः प्रशस्ताकथितावुधैः सूचीमुखग
तिस्तस्यसायकस्यप्रजायते पत्रंविलोकितं यस्य अथवाहीनपत्रकं २ कर्कशेनतुचायेनयः
कृष्टोहीनमुष्टिना मत्स्यपुच्छागतिस्तस्यसायकस्यप्रकीर्त्तिता ३ भ्रमरीकथिताह्येषासद्भिः
स्तक्षमकर्मणि ऋजुत्वेनविनायातिक्षेप्यमाणस्तुसायकः ४ अथ वाणानांलक्ष्यस्खल
नगतयः वामगादक्षिणाचैवऊर्द्धगाधोगतातथा चतस्रोगतयः प्रोक्तावाणस्खलनहेतवः
१ कंपतेगुणमुष्टिस्तुमार्गणस्यहिपृष्ठतः संमुखाद्वाद्धतुर्मुष्टिस्तदावामेगतिर्भवेत् २
ग्रहणंशिथिलंयस्य ऋजुत्वेनविवर्जितं पार्श्वंतुदक्षिणंपातिसायकस्यनसंशयः ३ मोः

राम
३०

51

क्तिरेण चैव वाणस्य चामसुष्टिधरो भवेत् गुणामुष्टिर्भवेदूर्द्धं तदाधोगामिनी गतिः ४ अथपञ्चद्या
गतयः लक्ष्यवाणाग्रदृष्टीनां संगतिस्तु यदा भवेत् तदानीं मुष्टितो वाणो लक्ष्यान्न स्खलति ध्रु
वं १ निर्दोषः शार्ङ्गहीनश्च सममुष्टिर्द्वयोक्तितः भिनत्ति दृढवेध्यानि सायको नास्ति संशयः २
आकृष्टस्तेजितो यश्च सुपुङ्खो गाढमुष्टितः नरनागाश्वकायेषु न सतिष्ठति मार्गणः ३ यस्य
तृणसमा वाणा यस्येंधनसमं धनुः यस्य प्राणसमा मौर्वी स धन्वी धन्विनां वरः ४ अथ दृढ
चतुष्कं अयश्चर्मघटश्चैव मृत्पिंडं च चतुष्टयं यो भिनत्ति हि तस्येषु वज्रिणापि न धार्यते सा
र्द्धांगुलप्रमाणेन लोहयंत्राणि कारयेत् तानि भित्त्वैकवाणेन दृढघाती भवेन्नरः २ चतुर्वि
शति चर्माणि यो भिनत्तीषुणा नरः तस्य वाणो गजेंद्रस्य कायं निर्भिद्य गच्छति भ्राम्यज्जले घ
टे चेद्धयश्चक्रे मृत्पिंडकं तथा भ्रमंतं वेधयेद्यो हि दृढभेदी स उच्यते ४ अयस्तु काकतुंडे
न चर्म चारामुखेन हि मृत्पिंडं च घटश्चैव विध्येत्सूचीमुखेन हि ५ अथ चित्रविधिः वा

धनु॰
३१

31

52

णभंगंकरावर्त्तेकाष्टछेदनमेवच विंदुकंगोलकयुगंयोवेत्तिसजयीभवेत् १ लक्ष्यस्थानं
धृतंकांडंसमुखंछेदयेत्ततः किंचिन्मुष्टिंविधायस्वांतिर्यग्दृष्टिःफलकेषुणा समुखंवास
मायांतंतिर्यक्चापांतमंवरे शरंशरेणयःछिंद्याद्वाणछेदीसजायते १ अथवराटिकावर्त्तः
काष्टेचकेशंसंयम्यतत्रवध्वावराटकं हस्तेनभ्राम्यवाणंचयोहंतिसधनुर्द्धरः १ अथका
ष्टछेदनं लक्ष्यस्थानेन्यसेत्काष्टंसार्द्रंगोपुच्छसन्निभं यःछिंद्यात्तत्क्षुरप्रेणकाष्टछेदीसजाय
ते १ अथविंदुकं लक्ष्येविंदुंन्यसेच्छुभ्रंभ्रूमध्येवंधूकपुष्पवत् हंतितंविंदुकंयस्तुचित्रयो॰
धीसजायते १ अथगोलयुगं काष्टगोलयुगंक्षिप्तंदूरमूर्द्धपुरःस्थितैः असंप्राप्तंधरापृष्टेतत्फ॰
पुच्छमुखेनहि २ योहंतिशरयुग्मेनशीघ्रसंधाययोगतः सस्याद्धनुर्भृतांश्रेष्टःपूजितःसर्व
पार्थिवैः अथधावल्लक्ष्यं रथस्थेनगजस्थेनहयस्थेनचपत्रिणा धावतावेश्मःकार्योल
क्ष्यहंतुसुनिश्चितं १ अथशब्दवेधित्वं लक्ष्यस्थानेन्यसेत्कांस्यपात्रंहस्तद्वयांतरेताडये॰

राम॰
३[illegible]

53

च्छर्कराभिस्तंशाष्ट्ः संजायतेयथा यत्रैवोत्पद्यनेशाष्ट्स्तंसम्यक्तत्रचिंतयेत् कर्मेंद्रियमनो
योगात्लक्ष्यंनिश्चयतांनयेत् पुनःशर्करयातच्चताडयेच्छ्रष्टहेतवे पुनर्निश्चयतांनेयंशाष्ट्
स्थानानुसारतः ततःकिंचित्कृतंदूरेनित्यंनित्यंविधानतः लक्ष्यंसमभ्यसेद्धानेशाष्टव्यध
नहेतवे ततोवाणोनहन्यातद्दवधानेनतीक्ष्णधीः एतच्चदुष्करंकर्मभाग्यैःकस्यापिजायते५
अथास्त्रविधिः एवंश्रमविधिंकुर्याद्यावत्सिद्धिःप्रजायतेः श्रमेसिद्धेचवर्षासुनैवग्राह्यंध
नुःकरे १ पूर्वाभ्यासस्यशास्त्राणामविस्मरणहेतवे मासद्वयंश्रमंकुर्यात्प्रतिवर्षेशरद्दतौ २
जातेचाश्वयुजेमासिनवमीदेवतादिने पूजयेदीश्वरींचंडींगुरुंशास्त्राणिवाजिनः ३ विप्रे
भ्योदक्षिणांदद्यात्कुमारींभोजयेत्ततः देव्यैपशुबलिंदद्यादृष्ट्वावादित्रमंगलैः ४ ततस्त
साधयेन्मंत्रान्वेदोक्तानागमोदितान् अस्त्राणांकर्मसिद्ध्यर्थंजपहोमविधानतः ५ ब्राह्मं
नारायणंशैवमैंद्रंवायव्यवारुणं आग्नेयंचापरास्त्राणिगुरुदत्तानिसाधयेत् ६ [illegible]मनो

वाक्कर्मभिर्भाव्यंल्लव्यास्त्रेणश्चिवसता अपात्रमसमर्थंचददहंत्यस्त्राणिपौरुषं ७ प्रयोगंचोपसंहा
रं योवेत्तिसधनुर्द्धरः सामान्यकर्मणांप्राज्ञोनैनेचशस्त्राणियोजयेत् ८ इत्यस्त्रविधिः अथशस्त्र
वारणं हस्तार्केलांगलीकंदोगृहीतस्तस्यलेपतः शूरस्यापिरणेपुंसोदर्य्यंहरतिकातरः १
गृहीतंयोगनक्षत्रैरपामार्गस्यमूलकं लेपमात्रेणवीराणांसर्वशस्त्रनिवारणं २ अधःपु
ष्पीशंखपुष्पीलज्जालुर्गिरिकर्णिका नलिनीसहदेवीचपुत्रमार्जारिकातथा विष्णुक्रांता
चसर्वासांजटाग्नाह्यारवेर्दिने बद्धाभुजेविलेपाद्वाकायेशास्त्रौघवारिका सर्पव्याघ्रादिसत्वा
नांभूतादीनांनजायते भीतिस्तस्यस्थितापस्यमातरोष्टौशरीरके ५ गृहीतंहस्तनक्षत्रे
चूर्णंछुछुंदरीभवंतत्प्रभावाद्गजः पुंसः संमुखंनैतिनिश्चितं ६ छछुंदरीश्रीफलपुष्प
चूर्णैरालिप्तगात्रस्यनरस्यदूरात् आघ्रायगंधंद्विरदोतिमत्तोमदंत्यजेत्केशरिणोपयोगं
७ श्वेतादिकर्णिकामूलंपाणिस्थंवारयेद्गजं श्वेतकंदारिकामूलंव्याघ्रादीनांभयंहरेत्

कस्यापि सलिलादग्निरुत्थितइतिपदैकंसमस्या दामोदरकराघातविह्वलीकृतचेतसा दृष्टंचाणूरमल्ले
नशतचंद्रनभस्तले ५ वाणस्यचलतरंगरंमायांगंगायांप्रतिबिंबितं स्वचंद्रंशोभतेस्पर्धंशतचंद्रंनभ
स्तलं ६ श्रीराघवभट्टानां शतचंद्रंनभस्तलमितिपदैकंसमस्या भीष्मग्रीष्मर्तुसंतप्तशून्यरण्यांतर
स्थयोः अन्योन्यालापसुखिनोःपूनोश्चंद्रायतेरविः ७ कस्यापि पूनोश्चंद्रायतेरविरितिपदैकंसमस्या
सीतासमागमोत्कंठाकर्णांताकृष्टधन्विनः राघवस्यशरांगारैः समुद्रादग्निरुत्थितः ८ कस्यापि स
मुद्रादग्निरुत्थितइतिपदैकंसमस्या स्वस्तिक्षत्रियदेवायजगद्देवायभूभुजेयद्यशःपुंडरीकांतर्गगनं
भ्रमरायते ९ कस्यापि गगनंभ्रमरायतइतिपदैकंसमस्या यत्कंठेगरलंविराजतितरांशीर्षेचमंदा
किनीसत्संगेचशिवामुखंकटितटेशार्दूलचर्मांबरं मायायस्यभवंहरादिसकलंतस्मैनमः शंभवेजंबू
वज्जलविंदुवज्जलजवज्जंवालवज्जालवेत् १० कस्यापि जंबूवज्जलविंदुवज्जलजवज्जंवालवज्जा
लवत् इतिपदैकंसमस्यारम्यस्यैकंत्वकंभुजगयमिताःसप्ततुरगानिरालंबोमार्गोऽप्यचरणरहितःसारथि

रपि रविर्गच्छत्यंतं प्रतिदिनमयारस्यतमसः क्रियासिद्धिः सत्त्वेवसतिमहतांनोपकरणे ११ कस्यापि क्रिया
सिद्धिः सत्त्वेवसतिमहतांनोपकरणे इतिपदैकं समस्या विजेतव्यालंकाच्चरणतरणीयोजलनिधिर्विप
क्षः पौलस्त्योरणभुविसहायाश्चकपयः तथाप्येकोरामः सकलमवधीद्राक्षसकुलंक्रियासिद्धिः सत्त्वेव
सतिमहतांनोपकरणे १२ कस्यापि क्रियासिद्धिरित्यादिपदैकं समस्या धनुः पौष्पंमौर्वीमधुकरमयीचा
मनश्चनाहक्शांकोरोणाणः सुहृदपिजडात्माहिमकरः तथाप्येकोनंगस्त्रिभुवनमिदं व्याकुलयति क्रियासि
द्धिसत्त्वेवसतिमहतांनोपकरणे १३ क्रियासिद्धिरिति घटोजन्मस्थानंमृगपरिजनोभूर्जवसनं वनेवासः
कंदैरशनमपिदुस्थंवपुरिदं तथाप्येकोगस्त्यः सकलमपिवद्याब्धिमपिबत् क्रियासिद्धिः १४ अस्माकंज
लजीविनांजलमिदंसद्वाजिराजिव्रजैः पातव्यंपरचक्रमनसांतन्निःपतीनांक्षयः मत्त्वैवंमहराजदे
वनृपतेत्वद्भैत्रयात्रोत्सवेमत्सीरोदितिमक्षिकाचहसितिध्यायंतिवामभ्रुवः १५ श्रीआनंददेवानो
मत्सीरोदितीत्यादिरितिपदैकंसमस्या स्फुरितेजठरेविस्मिर्न्नवनीतभुजः शिशोः मक्षिकापादघातेनकं

57

पितंभुवनत्रयं १६ शार्ङ्गधरस्य मद्रिकापादघातेनेत्यादिपादद्वयंसमस्या रामाभिषेकेमदविह्वलायाः करच्युतोहेमघटस्तरुण्याः सोपानमासाद्यकरोतिशब्दं ठठंठठठंठठठंठठठः १ कस्यापि ठंठंठठठंठठठंठ ठंठ इतिपदैकंसमस्या उत्तमस्यसकचग्रहमास्यंचुंबतिप्रियतमेहठवृत्त्या ऊंहुंहुंहुऊंह ऊंहुऊंहूंहूंकू जितंभवतिमानधनायाः १९ विज्जकायाः ऊंउंऊंहूहू उंह उंझूंझं इतिपदैकंसमस्या प्रलयमहाघकरावचि तांगोल्लानावम्यसकलभूमिरुहां विलसतिदवदहनावलिहजलवाहः परंशरणं एवमुरारेः प्रलयमहा॰ घकरावचितांगोल्लानावम्यसकलभूमिरुहां विलसतिदवदहनावलिरिहजा इतिपदैकंसमस्या सुरता यनमस्तस्मैजगदानंदहेतवे आनुषंगिफलंयस्यभोजराजभवादृशाः २० सरस्वतीकुटुंबदुहितुः सुरता यनमस्तस्मैजगदानंदहेतवे इतिपदद्वयंसमस्या अतसीपुष्पसंकाशंखवीक्ष्यजलदागमे येवियोगेवि जीवंतिनतेषांविद्यतेभयं २१ मेघस्य अतसीपुष्पसंकाशंनतेषांविद्यतेभयं इतिपदद्वयंसमस्या मम करग्रहणाययरीकृतंकठिनंधनुः २२ कस्यापि त्र्यंबकशृंगमयंकठिनंधनुः इतिपदैकंसमस्या॥

इति श्रीदामोदरसूनुशार्ङ्गधरविरचितायां पद्धत्यां समस्याख्यानपरिच्छेदो द्वाविंशः ३२ अथ प्रहेलिकापद्धु
तिकूटाख्यानं अपदो दूरगामी च साक्षरो न च पंडितः अमुखः स्फुटवक्ता च यो जानाति स पंडितः १ कस्यापि
अत्र लेखपत्रं प्रकटीकृतं वने जाता वने त्यक्ता वने तिष्ठति नित्यशः पराधीना न तु सा वै रूपा यो जानाति
स पंडितः २ अत्र नौका प्रकटीकृता गोपालो नैव गोपालस्त्रिशूली नैव शंकरः चक्रपाणिः स नो वि
ष्णुर्यो जानाति स पंडितः ३ कस्यापि अत्र महोक्षः प्रकटीकृतः उच्छिष्टं शिवनिर्माल्यं वमनं शावकर्पटः ।
काकविष्ठासमुत्पन्नाः पंचैते तिपवित्रकाः ४ उच्छिष्टं दुग्धं शिवनिर्माल्यं गंगा वमनं मधु शावकर्पटं पट्टां
वरं काकविष्ठासमुत्पन्ना पिप्पलादयः इति प्रकटीकृतः विजितात्मभवद्वेषिगुरुपादहतो जनः हिमापहा
मित्रधरैर्व्याप्तं व्योमाभिनंदति ५ दंडिनः विनागरुडेन जितः इंद्रः तदात्मभव अर्जुनः तद्द्वेषी कर्णः तद्गुरुः
सूर्यः तत्पादहतः तत्किरणसंतप्तः हिमापहाग्निः तदमित्रं यानीपं तद्धरो मेघः इति प्रकटीकृतः कश्चिन्म
गाक्षी प्रियविप्रयोगे गंतुं निशापारमपारयंती उज्झातुमादाय करेण वीणामुड्डीवमालोक्य शनैरुरासीत् ६

कस्यापि वीराणां किमर्थंहासीत् मत्तोयं गीतप्रियो मृगांके मृगोमत्प्रयुक्तं गीतमाकर्णयितुं ततश्चेदवतरयति
तदा चंद्रो निष्कलंकः स्यात् मन्मुखसाम्यं च लभेत् प्रियविप्रयोगे संतापकरो मे हिमांशुः अतोस्यशत्रोः चंद्र
मसो मन्मुखशाम्यं भूयात् इति वीराणामहासीत् इति प्रकटीकृतोयमर्थः तरुणपालिंगितः कंठेनितंवस्थल
माश्रितः गुरूणां संनिधानेपिकः पूजतिमुहुर्मुहुः ७ अत्र कलत्राः प्रकटीकृतस्तव लोक्यस्तनौवध्वा गुं
जाफलविभाषितौ निश्वस्यरोदितुं लग्नाकुंतोव्याधकुटंविनी ८ धर्मदासस्य शावरस्त्रीपुत्रयायाः स्त
नौ गुंजाफलालंकृतौ दृष्ट्वाकुतो निश्वस्य करोदपतोमत्पुत्रः एनामनुरक्तस्तथा हीराणां गतोयथा गजा
न्निनिहत्य गजमुक्ताफलहारैस्तनौ विभूषयितुं नालं अतो निःप्रयासग्राह्यै गुंजाफलैर्विभूषयति पुत्रे दरी
णोसति तदर्जित निर्वाहवृत्तेः सर्वस्यापि कुटुंवस्यजीवितसंदेहः अतोव्याधकुटुंविनी दुःखान्निश्वस्य
रोदितुं लग्ना इति प्रकटीकृतोयमर्थः गीत्वा किमपि व्याधः शृंगजग्नाहतरुणहरिणस्य तमपसमी
स्योघतकरमेणीमपिलज्जिता व्याधी ८ शार्ङ्गधरस्य अस्यार्थः व्याधः किमपि अद्भुतं गीत्वा गीतमूर्छ

तावि लीनचित्तस्य तरुणहरिणस्य शृंगं जग्राह किमर्थं जग्राह यतोऽमर्जीतमुखितस्त्वं याचकस्य मे इदं शिरोदा
नं देहि अथ तं हरिणं शिरोदानाय उद्यत करं समीक्ष्य तज्जाया हरिणी पत्युर्भक्त्या निजशिरोदानाय उद्यत्क
रं समीक्ष्य व्याधसार्थचारिणी व्याधी लज्जिता केन हेतुना लज्जिता यतः अयं हरिणो दाता इयं च हरिणी प
तिभक्त्या दातुं जीयामत्कांतो याचक अहं याचकजाया वरमेते पशवो न वयं मनुष्याः इति लज्जिताऽयं प्र
थमोऽर्थः अथ वा व्याधजायया परिणीतः एव पुरुषो मृतः स च विद्यमानः संगृहीतो द्वितीयः पुरुषः तं च
विलोक्य चिंतितवती यतो निजकांतावियोगासहिष्णुः शिरोदानायोद्यतकरायतिभक्त्या वरमियं हरिणी
परिणीतश्रीयमरणोपि जीविता संगृहीतभर्तृका च असती चाहं मानुषी इति लज्जिता इति द्वितीयोऽर्थः अथ
वा इति चिंतितं तया यतो येन करेण गीतं श्रुतं तस्य गातुः कर्णस्य पुरो याञ्चापैकरेण प्रसारितो व्याधेन
नीरसकठितकुटिलस्य शृंगस्य पुरः करः प्रसारितः अनुचितं कृतं मूढेन कृतेऽप्यनुचिते अकृतपात्र
विचारो गीतरसज्ञः स्वभावकृपणोपाचकं जानन् मृगयूथपतिर्निजशिरोदानाय उद्यमकरो जातः अतो व्या

61 धीतं हरिणां च तुरंङ्गात्वा तं च माधं मूर्खं ज्ञात्वा एणीव दृष्ट्वा लज्जिते ति तत्तीयोर्थः इति प्रहेलिकाः अथापह्नुतिः
रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति तत्किं तरुणी नहि नहि वाणी वाणस्य मधुरशीलस्य १
सीत्कारं संजनयति व्रणयत्यधरं तनोति रोमांचं नागरिकः किमु मिलितो नहि नहि सखि हैमनः पवनः
२ धर्मदासस्यैतौ वर्षति मेघे नितरां मपतित पाने वज्राक्यते स्यातु उत्कंठितालितरते नहि नहि सखि।
विछिन्नः पंथाः ३ कस्यापि प्रहरति न पंचवाणः केवलमवलेनि मेषोपि वर्षति परं न देवः ज्ञानद्वा
धि विप्रयोगे ते इत्यपह्नुतिः अथ कूटाः केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः रुदंति कौरवाः सर्वे हा के
शव कथं गतः १ कस्यापि के जले शवं मृतं के द्रोणकृष्णकाकः कौरवाः शृगालाः इति सुबोधमेतत्पद्यं।
अंबरमंबुनि पत्रमरातिः पीतमहीनगणस्य ददाह यस्य वधूस्तनयं ग्रहमज्ञा पातु स वो हरलोचनवह्निः
२ कस्यापि दूरान्वयः स कृष्णः वो युष्मान् पातु यस्य अंबरं पीतं यस्य गृहं अंबुनि॥ यस्य पत्रं अहीनगण
स्य अरातिः यस्य वधूः अज्ञा यस्य तनयं हरलोचनवह्निर्ददाह इति सुबोधमेतत्पद्यं लक्ष्मीर्या दोनिधे

योदोनादोवादोचितंवचः विभ्यतीधीवरेभ्योयाजडेष्वेवनिमज्जति ३ कस्यापि लक्ष्मीर्यादोनिधेःसमुद्रस्यपा
दःजलजंतुः अदोवचःचादोचितंनयतोधीवरेभ्योविचक्षणेभ्योविभ्यतीत्रसंती जडेष्वेवकर्दमेष्वेवनि
मज्जतितिसूक्ति इतिसुबोधमेतत्पद्यं पानीयंपातुमिच्छामित्वत्तःकमललोचने। यदिदास्यसिनेच्छामिनो
दास्यसिपिवाम्यहं ४ कस्यापि यदिदासीअसिनेच्छामिनोदासीअसिपिबाम्यहं इतिसुबोधमेतत्पद्यं।
नदीजलंकेशवनारिकेतुर्नगाह्वयोनामनगारिसूनुः एषोंगनावेषधरःप्रमाथीजित्वावयंनेष्यतिचाघ
गावः ५ बालभारतस्य नामभोःनदीजभीष्मएषदृश्यमानः अंगनावेषधरःस्त्रीरूपधरःलंकेशवना
रिकेतुःवानरध्वजःनगाह्वयोर्ज्जुननाम यतःकिंभूतः नगारिसूनुःइंद्रपुत्रःउभोःकौरवाःअयंप्रमा
थीहंता अघवोयुष्मान् जित्वागाअनेष्यतिइतिसुबोधमेतत्पद्यं चंचद्द्वादशनीलनीरजपुतंसम्भ्रांतुने
त्रासितः नित्यंबोडशशोणपद्मरुचिरंधात्रानिशंसेवितं क्षीरांभोधिमहंस्वरस्वदलसत्पर्यंकविश्रांति
यत् पायाद्वःकमलांगसंगिशपनंतन्नीलरोचिर्महः ६ शार्ङ्गधरस्य अस्यव्याख्यातन्नीलरोचिःरूपम

63

प्रभंमहस्तेजः कृष्णलक्ष्मणांवोयुष्मान्पायात् तत्किंभूतं कमलांगसंगिनायनंलक्ष्मीनाथनाथं पुनःकिं
भूतंसहस्रदलसत्पर्यंकविश्रांतिःसहस्रफणादिव्यनागायनशेषस्थितं पुनःकिंभूतंक्षीरांभोधिगृहंदु
ग्धसमुद्रनिवासंपुनःकिंभूतंधात्रानाभीसरोरुहस्थेनब्रह्मणाअनिशंसंसेवितंअध्यासितंपुनःकिंभूतंषो
डशाशोणपद्मरुचिरंषोडशारुणाकमलमनोहरं षोडशाशोणपद्मानांविवृतिःविष्णोश्चत्वारोहस्ताः
द्वेचरणे तावंतएवब्रह्मणःद्वौहस्तौद्वौपादौलक्ष्म्याः एवंषोडशाशोणपद्मरुचिरंपुनःकिंभूतंनित्यं
अविनाशि पुनःकिंभूतंसप्तांबुजोद्भासितंसप्तांबुजानांविवृतिः चत्वारिमुखानिब्रह्मणःएकंना
भिसरोरुहं एकंविष्णोर्मुखंएकंलक्ष्म्यामुखं एवंसप्तांबुजोद्भासितंपुनःकिंभूतंचंचद्द्वादशनीलनीर
जयुतं शोभमानाद्वादशनीलोत्पलयुतं द्वादशनीलनीरजानांविवृतिःअष्टौनयनानिब्रह्मणोद्वेवि
ष्णोःद्वेलक्ष्म्याःएवंद्वादशनीलनीरजयुतं अत्रप्रकृतिरलंकारः इतिसुबोधमेतत्पद्यंविकसति
नयनाभ्यांकैरवंपंकजंचम्लययतिचरणत्वंब्रह्मचर्यपयोधे उरसिलसतियस्यश्रेयसांसंपदायःसफणि

36

64

नमधिशेते पद्मया पद्मनाभः ७ अभिरामपत्तुपतेः अस्य व्याख्याः स पद्मनाभः पद्मया सह फणिनं शेषं अधिशेते यस्य नयनाभ्यां चंद्रसूर्यलक्षणाभ्यां कैरवं पंकजं च विलसति यस्य चरणाब्जं गंगाजलं पयोधेः ब्रह्मचर्यं श्लथयति दूराकरोति यस्य उरसि श्रेयसां संप्रदायः कौस्तुभमणिर्लसति एवंविधः पद्मनाभः फणिनमधिशेते अत्रापि अपह्नुतिरलंकारः इति सुबोधमेतत्पद्यं इति श्रीदामोदरसुनुशार्ङ्गधरविरचितायां पद्धत्यां प्रहेलिकाव्याख्यानपरिच्छेदस्त्रयस्त्रिंशः ३३ अथ क्रियागुप्तकर्तृगुप्तकर्मगुप्तसंधिगुप्तविंदुमतीचित्रभाषाचित्राख्यानं आगतः पांडवास्सर्वे दुर्योधनसमीहया तस्मै गां च सुवर्णं च रत्नानि विविधानि च १ कस्यापि यः धनसमीहया आगतः तस्मै सर्वे पांडवाः गां च सुरत्नं च विविधानि रत्नानि अदुः ददति स्म इति क्रियागुप्तं गौरीनखरसाहत्त्रपञ्चशुभ्रयात्रिशिनं दधौ इहैव गोप्यते कर्ता वर्षेणापि न लभ्यते कस्यापि इः कामः तं हंतीति इहा ईश्वरः इति कर्तृगुप्तं अन्नवस्त्रसुवर्णानि रत्नानि विविधानि च ब्राह्मणेभ्यो नदीतीरे ददाति ब्रजसत्वरं २ कस्यापि हे ब्राह्मणाः इभ्यः समृद्धः इति कर्तृगुप्तं एहीहे रमणि पश्य कौतुकं धूलि

65

धूसरतनुं दिगंबरं स्नापितस्तद्वदनपंकजंपपौ भ्रातरुक्तमपि किंनवुध्यसे ४ कस्यापि कौ पृथिव्यांतुकं वा
ल्लकं इतिवालकर्मगुप्तं पिवतस्तेत्राऽऽवेणवारिकल्हारशीततंकेनेमौदुर्विभदग्धेन हृदये सन्निरोपि
तौ ५ शरौ वाणौ एणहिरण इतिसंधिगुप्तं वटवृक्षो महानेषमार्गमावृत्य तिष्ठति तावत्त्वयानगंत
व्यं पावन्नान्यत्र गच्छति ६ कस्यापि वटोत्रालग्नाक्षोभद्रक: इत्यपिसंधिगूढकं नमयागोरसा
भिज्ञं वेतः कस्मात्त्वं कुप्यसि अस्यान रुदितैरभिरलमालोहितेक्षणे ७ दंडिनः ननिषेधः मेममत्रा
गोरसाभिज्ञं अपराधरसंज्ञात इत्यपिसंधिगुप्तं अथविंदुमती त्रिनयनचूडारत्नमित्रंसिंधोः कुमु
द्वतीदयितः अपमुद्यतिशुस्तणाहरमरणीवदनोपमश्चंद्रः ८ इतिविंदुमती अथ चित्रं ॥ विश्व
स्य हेतुरमरैर्वज्ञगीयसे तं विश्वंभरेश्वरवशिवे त्रिगुणात्ममूर्त्ते चिद्व्योमतोपि परमां त्वयमं वदंति त्वां
योगिनः स्तुतिपराः प्रणिधानदृष्ट्या ९ शार्ङ्गधरस्य अस्य वसंततिलका छंदस्त्रो दुर्गास्तुतिरूपस्य पद्य
स्य चतुर्णामपि पादानां षष्ठसप्तमाष्टमाक्षरलोपेन इंदुवज्रावृत्तं शिवस्तुतिश्च जायते नमामि मामनो

उन्नमानंमुनिममानिनं नानाननममानाममोंनामानमुमेनमुं १० शार्ङ्गधरस्य नमामिनमस्करोमि कं ओंवि
ष्णुंनकेवलंओंउमेनंपार्वतीनाथंहरमित्यर्थः किंभूतंमाम नोनुन्नमानंमा लक्ष्मीस्तस्यामनमः नुन्नः अपह
तः मानोयेनसतथातं लक्ष्मीचांचल्यगर्वापहरणं पुनः किंभूतंमुनिंयोगीश्वरं पुनः किंभूतं अमानिनंनास्ति
मानोयस्यासौतंपुनः किंभूतंनानाननंनानाविधानि आननानिमुखानियस्यासौतं दशावतारत्वात् नैक
विधमुखंपुनः किंभूतं अमानामं अमानं आकाशं अमतिक्रामती अमानामस्तंपुनः पुनः किंभूतं ओंनामा
नंब्रह्मस्वरूपं एवंविधउमेनंहरिहरं नमामि घटखर्परः तारतार तरै रै तैरुतरोत्तरस्तोरुतैः रतातरीतिशरैरैति
तीरेतीरेतरौतरौ ११ घटखर्परः कालिदासस्य नागविशेषविशेषविशेषविशेषसंहृतेजगति हंस्यपि कालंकालं
कालंकालंघनेस्तुतिर्भवति १२ देवेश्वरस्य सानुप्रासः लीलास्मितेन शुचिनाम् उत्तोदितेनव्यालोकि
तेनलघुनागुरुणागतेन व्याजृंभतेनजयनेनचदर्शितेनसाहंतितेनगलितंममजीवितेन १३ दंडिनः सा
नुप्रासः मधुरपामधुवोधितमाधवीमधुसमृद्धिसमेधितमेधया मधुकरांगतयामुहुरुन्मदध्वनिभृतानि

हस्ततः परं तृतीयं किंचिदुच्चं स्यात्खंडं गमकशोभनं ततो द्विखंड आभोगस्तृतीयं तस्य खंडकं
उच्चं गमकयुक्तं वा न चास्यामंकितं च तत् उद्ग्राहस्याद्यखंडे च न्यासः स ध्रुवको मतः एवं द्विप
दयदः प्रोक्त उत्तमो ध्रुवको बुधैः पंचपादस्य तद्ग्राहे पदयुग्मं प्रशस्यते तृतीयं चोपखंडं स्या
द्विरभ्यस्तमिवं क्रमं आभोगश्चैकखंडः स्याद्द्वितीयं चोच्चखंडकं तुल्यनामांकितं चैतदिति
मध्यमलक्षणं ३१ चतुष्पादस्य तूद्ग्राहे पदैकं स्यात्ततः पदं किंचिदुच्चं द्वितीयं स्याद्द्विरभ्य-
स्तमिदं द्वयं ३२ आभोगे च एकं स्यात्किंचिदुच्चं द्वितीयकं प्रभुनामांकितं चैतत्कनिष्ठस्येति
लक्षणं ३३ सर्वेषां पदानां वा वर्णनियमो वा द्वयोर्भवेत् पदयोर्वर्णनियमो ध्रुवाणां हि द्विधा
गतिः ३४ पदद्वये पदा वर्णनियमः क्रियते बुधैः तदा पदानि चान्यानि भवंति नियमं विना
३५ एकादशाक्षरात्पादादेकैकाक्षरवर्द्धितैः खंडैर्ध्रुवाः षोडशाः स्युः षड्विंशत्यक्षरावधिः
३६ रसतालादिवर्णैश्च ध्रुवाणां लक्षणं शुभं प्रोक्तं रागार्णवे सर्वं संक्षेपादिह कथ्यते ३७

37A

श्रीः
२७ 68

अथषोडशध्रुवाणांनामानि जयंतःशेखरोत्साहैततोमधुरनिर्मलौ कुंतलःकमलाचा
रोनंदनश्चंद्रशेखरः कामदोविजयाख्यश्चकंदर्पजयमंगलौ तिलकोल्ललितश्चेतिध्रुवाः
षोडशाकीर्त्तिताः आदितालोजयंतःस्यात् शृंगाररससंयुतः रुद्रैःसंख्याक्षरपदैरायुर्हंद्धिक
रःपरः एकएवलघुर्यस्मिन्नादितालःसकथ्यते ४० सयथा द्वादशाक्षरपादोन्योभागेकफ
लप्रभोः हंसकेचरसेवीरेगीयतेशेखराह्वयः ४१ लघुर्गुरुर्लघुर्यत्रसतालोहंसकःस्मृ
तः सयथा उत्साहःस्याद्रसेहास्येतालेकंदुकसंज्ञके वंशाभिवृद्धिकृद्धिकृत्यादशत्रयोदश
मिताक्षरः लघुद्वयंविरामांतंतालेकंदुकसंज्ञिते ४३ सयथा गार्गतालेनगीयेतकारुण्येम
धुरोध्रुवः अंघ्रिद्विसप्तभिवर्णैरानंदफलदःसदा चतुर्द्रुतोविरामांतस्तालोयंगार्गसंज्ञकः
४४ सयथा।००००। क्रीडातालेध्रुवःसस्यात्पचैर्वर्णैर्हिनिर्मलः शृंगाररससंयुक्तःश्रोतुः
स्तेजोतिवर्द्धनः ४६ एकएवद्रुतोयस्मिन्क्रीडातालःशृंगारसकथ्यते ४६ सयथा वर्णैःषोड

राम
३७

69

भृतात्त्वरमुज्जगे १४ माघकवेः कठिनानुप्रासाज्ञासहितंचचतुर्थपादांतयमकं आम्नायानामाहांत्यावा
गीतिर्नीतिर्भीतिः प्रीतिर्भोगो रोगो मोदो मोहो क्षेमे देशे ध्यायेच्चेच्छेत् १५ दंडिनः चतुर्मात्रकात्विद्य
न्मालाछंदः अस्याव्याख्या आम्नायानांवेदानां अंत्या वागुपनिषत् आह अकथयत् किं आह इतीःनी
तिः भीतिः प्रीतिर्भोगः रोगः मोदः मोहः क्षेमेशुभे देशे आत्मपरात्मनोर्ध्यायेत् इच्छेत् इतिचित्राणी अ
थभावाचित्रं उत्सरंगकलितोरुकटारीभाजिराउत्तभयंकरभालाः संतुपापकगणाजपतैस्त्वंगाम
गोहरमिलावइलावी १६ कस्यापि अस्यव्याख्या हे राजन् तवपापकगणाः सेवकलोकाः उत्सरंग
कलितोरुकटारीभाजिरासंतु उत्सरंगा अतिमुदितोः कलितोरुकटाः सज्जितपृथुलकपोलाः येअ
रीभाः शत्रुगजाः तेषांपोसो आजिः संग्रामः तराति ददतीति उत्सरंगकलितोरुकटाराभाजिराःउत्तपु
नः भयंकरभालाः भृकुटीभीषणललाटाः संतु तैः पापकगणैः इलाऽवः पृथ्वीरक्षकः इलावीजीतकं
टर्यस्त्वं अगोहरं अगोऽहं यथास्यात् एवंगां पृथिवींजपपरदेशात् आत्मायात्कुरु नूनंवादल ८

70

छाइशोहपसरीनिस्सारणशब्दःखरःशत्रुंपादितुबालितोदिहनिःसोएवंभणत्सुभटाःकूठेगर्वभरामघालिस
हसारेकंतमेरेकहे कंठेपागनिवेझ्रियाहिशरणंश्रीमल्लदेवंप्रभुं ९७ श्रीकंठपंडितस्य इतिभाषाचित्रं॥
इतिश्रीदामोदरसुनुशार्ङ्गधरविरचितायांपद्धत्यांक्रियागुप्तादिकाख्यानपरिछेदश्चतुस्त्रिंशः ३४ अथप्र
श्नोत्तराख्यानं तेषुअंतरालापः॥गछंतिक्वापिवक्रौहुतनिजतनवःकामिनंतिस्वकूलंकिंस्याद्घोज्यंविकल्पे
क्वकचनिभनखैःकिंनसिंहेणभिन्नंकीदृग्दित्याप्रसूतिःकिमनलशमनंकानपेःपालनीपाकोवंधःकः
प्रमार्ष्टित्रिभुवनकलुषंस्वर्धुनीवारिपूरः १ कस्यापिस्वर्धुनीवारिपूरःपुनरपिअनुलोपेनस्वर्धुनीःवा
अः४ रिपूरःपुनरपिस्वर्धुनीवारिपूरःपुंसःसंबोधनेकिंविदधातिकरिणांकेरुजोग्रेर्भिषक्किं काश्नून्यातेरिपू
णांनरवरनरकंकोवधीज्ञोचकंकिं केवानर्षासुनस्सुर्द्धिसमिवहरिणाकिंनखाग्रैर्विभिन्नंकोवामार्गेवि
सर्पन्विघटयतिनतूल्लर्मदावारिपूरः २ कस्यापि नःमदाःवारिःपूःअःपुनरप्यनुलोमेननर्मदावारिपू
रःपुनःपुनःसर्वंनर्मदावारिपूरःकेभूषयंतिस्तनमंडलानिकीदृक्सुमाचंद्रमसःकुतःश्रीःकिमाहसीतादश

71

कंठभीताहारामहादेवरतातमातः ३ कस्यापि हाराः महादेवरतातमातः रात्रेः पुनः सर्वं हारामहादेवर
तातमातः रवेः कवेः किं समरस्य सारः कृषेर्भयं किं प्रमुषंति भृंगाः खलाज्जयं विष्णुपदं च केषां भागीर
थीतीरसमाश्रितानां ४ कस्यापि भाः गीः रथी ईतिरसं आश्रितानां पुनः सर्वं भागीरथीतीरसमाश्रितानां।
कः प्रार्थ्यते मदनविह्वलया युवत्या भाति क्व पुंड्रकमुपैति क ध्रुवतां पुंश्चां नारदो भवति केन च रज्यते
ऽनं वाह्यास्थि किं फलमुदाहर नालिकेरं ५ कस्यापि ना अलि के अरं पुनः प्रतिलोमेन रंके अलिना पु
नः सर्वं नालिकेरं कस्य मरौ दुरधिगमः कः कमले कथ्यप विरचितावासः कैस्तुष्यति चामुंडारिपुवक्त्रे वद
कुतोऽभ्रष्टाः ६ धर्मदासस्य आघुत्तरजातिः कस्य जलस्य कः भ्रमरः कैः द्विरोभिः कृतः पृथिव्याः नलिनीदल
गतजललववतरलं किं यौवनं धनमथायुः के ज्ञाज्ञाधाकरनिकरानुकारिणः सज्जना एव ७ कस्यापि
किं क्रूरं स्त्रीहृदयं किं गृहिणः प्रियहिताय दारगुणाः कः कामः संकल्पः किं दुःकरसाधनं प्रज्ञा ८ दं
डिनः अथ प्रश्नोत्तरेषु बाह्यालापः नीचेषु पावनी वाणी काकः स्याच्छुभदो जने शंभोरावरणं कंभजं

प्रा०कु० ३९ 39 बा ३
72

त्तेव्याधयोजनं ८ श्रीहरिदेवानां प्रश्नोत्तरं किं अवेलाभोजितं अवेलाभः अजिनं पुनः सर्वं अवेलाभोजनं
कस्मिन्स्वपिति कंसारिः काद्दतिरधमानृणां किं कुरुते पितरं बालः किं दृष्ट्वा रमते मनः १० कस्यापि प्रश्नो
त्तरं किं शेषे से वा पर रूपं शेषे से वा पर रूपं अथ प्रश्नोत्तरेषु उक्ति प्रत्युक्तयः कियन्मात्रं जलं विप्र जानु
दघ्नं नराधिप तथापीयमवस्थाते न हि सर्वे भवादृशाः ११ प्रथमपदं तृतीयपदं च नदीमुत्तितीर्षोर्भोजरा
जस्योक्तिः द्वितीयपदं चतुर्थपदं च राजदर्शनार्थं गच्छन्नकाष्ठभारवाहपंडितस्य प्रत्युक्तिः भूरिभारभरा
क्रांतबाधति स्कंध एव ते न तथा बाधते स्कंधो यथा बाधति बाधते १२ पूर्वार्द्धं मृगयायां गृहमागच्छतः
शिविकारूढस्य भोजस्योक्तिः उत्तरार्द्धं च राजदर्शनार्थं गच्छतः शिविकावाहपंडितस्य प्रत्युक्तिः यदेतच्चं
द्रांतर्जलदलवलीलां वितनुते तदाचष्टे लोकः शशक इवेति नो मां प्रति तथा अहं त्विंदुं मन्ये त्वदरिवि
रहक्रांततरुणीकटाक्षोल्कापातव्रणकिणकलंकांकिततनुं १३ पूर्वार्द्धं रात्रौ चंद्रमसं वर्णयतो भो
जराजस्य उत्तरार्द्धं च राजदर्शनार्थं गच्छन्नचोरस्य पंडितस्य २ दमनुचितमत्र मम श्चपुंसां यदिह जराख्य

73

पिमान्मथाविकाराः इदमपिनकृतंनितंविनानांस्तनयतनावधिजीवितंरतंवा १४ पूर्वार्द्धंसारिकोक्तौउंकु
वैत्याः शीलाभट्टारिकायाः उत्तरार्द्धंचभोजराजस्य अष्टौहाटककोटयस्त्रिनवतिर्मुक्ताफलानांतुलाः
पंचाशन्मधुगंधलुब्धमधुपाः क्रोधोद्धुराः सिंधुराः लावण्यापचप्रपंचचतुरंपण्यांगनानांशतंदंडे
पांड्यनृपेणढौकितमिदंवैतालिकायार्पय १५ निखिलमपिपद्यंविज्ञापयतोभांडागारिकस्यउक्तिः
वैतालिकायार्पयेन्निचसप्तानुत्तराणिवैतालिकगीतदत्तकर्णस्यविक्रमादित्यस्यप्रत्युक्तिः अलम
तिचपलत्वात्स्वप्नमायोपमत्वात्परिणतिविरसत्वात्संगमेनांगनायाः इतिपदिशतकृत्वस्तत्वमा
लोचयामस्तदपिनहरिणाक्षीविस्मरत्यंतरात्मा १६ पूर्वार्द्धंशिष्यंप्रदत्तोगुरोक्तिः उत्तरार्द्धंचराज

ना३

कन्यानुरक्तस्यविहरणस्यभित्तिलेखप्रत्युक्तौ अंगणांतर्दिदमुन्मदद्विपश्रेणिशोणितवाहारिणोहरेः
उल्लसतरुणाकेलिपल्लवाशंकितंत्यजतिकिंमतंगजः १७ पूर्वार्द्धंतच्चित्तपरीक्षिकायाराजक
न्यायाउक्तिः उत्तरार्द्धंतदनुरक्तस्यविल्हणस्यप्रत्युक्तिः निरर्थकंजन्मगतंनलिन्यायया न दृष्टंतु

50

74

ह्निनांशविंवं उत्पत्तिरिंदोरपिनिःफलैवस्यष्टा बिनिज्ञानलिनीनयेन १९ पूर्वार्द्धविद्धूणस्योक्तिः उत्तरा
र्द्धं राजकन्यायाः इतिश्रीदामोदरसूनुशार्ङ्गधरविरचितायां पद्धत्यां प्रश्नोत्तरेषु अंतर्लापबाह्यालापोक्तिप
रिच्छेदः पंचत्रिंशः ३५ अथजातिः मंडलीकृत्यवर्हाणी कंठैर्मधुरगीतिभिः कलापिनः प्रनृत्यंति काले जी
मूतमालिनि १ कलङ्कितगर्भेणकंठेनाघूर्णितेक्षणः पारावतः पराहृत्य रिरंसुश्चुंबति प्रियं २ एतौ
दंडिनः स्थित्वास्थैर्याद्दुपांभः समजवरशिराश्चक्रमूर्तिर्मुहूर्त्तं धूर्तः संत्यक्ततीरः कतिचिदपि पदान्युच्च
कैः कुंचितांघ्रिः पश्चाद्ग्रीवां प्रसार्य त्वरितगतिरपां मध्यमाविश्य चंच्वा चंचंती मूर्द्धकंठः कथमपि शफ
रीस्फारिताक्षो वकोत्ति ३ गोविंदराजदेवानां स्यंच चंचलचंचुचुंवन चलच्चूडाग्रमुग्रं पतच्चक्राकार
करालकेसरसटास्फारस्फुरत्कंधरं वारंवारमुदंघ्रिचंचलघनभ्रभ्रपन्नखव्यूहसापोदष्टाकुर्कुटपोर्द्व
योस्थितिरितिक्रूरक्रमं युध्यतोः ४ वारंरुच्चैः पक्षाव्युत्क्षिप्यधुन्वन्सकलतनुरुहाभोगविस्तारिता
त्माप्राग्गेवोड्डीननिद्रस्फुरदरुणकरोन्नासितं स्वंनिरीक्ष्य प्रातःप्रोत्स्यायनीडस्थितचपलतनुर्घर्घरध्वा

75

नमुच्चैरुद्ग्रीवंपूर्वकायोन्नतविकट[illegible]कुक्कुटोरारटीति ५ कस्यापि आलोकत्रस्तनारीकृतसभयमहानाद
धावज्जनौघव्याप्तद्वारप्रदेशान्नपुर[illegible]कर्णनस्तब्धचक्षुः काहंदंडप्रहारोत्पतितमुखरजनैस्ताडि
तोल्लोष्टघातैर्भीतः सर्व्वोगृहस्थानधि[illegible]कोणतोकोणमेति ६ द्विविरकिशोरस्य धूलीधूसरतनचो^
राज्यस्थितिर्विरचनकल्पितैकतरणः कृ[illegible]विकाराः क्रीडंतिसुनिर्भरंडिंभाः ७ रुद्रदत्तस्य आपातोभ
वतः पितेतिसहसामातुर्निर्देशमोदितं धूली[illegible]रेतोविहायशिशुभिः क्रीडारसान्मुक्ततात् दूरात्स्मेरमुखः
प्रसार्यल्ललितंबाहुद्वयंबालकोनाथ[illegible]समेतिपरयाप्रीत्यारटन्मुर्धरं ८ उत्कटस्य अकूर्चोरं
भोपिप्रतिचिबुकदेशंकरतलंप्रतिज्ञ[illegible]यांकुर्वन् युवतिषुदेशंस्निग्धतरलं कुमारोहंकारात्परिषद्विसमा^
नानगणायन् भुजौवक्षःपत्रपन्नववय[illegible]नुते ९ शार्ङ्गधरस्य खड्गहस्तोरिमालोक्यहर्षामर्षसम
न्वितः शूरः पुलकितोरक्तनेत्रोहसतिज[illegible] १० लक्ष्मीधरस्य गापतीहसतिचनृत्यतिहृदयेनध्यातांप्रियांवि
चिंतयति समविषमंनचविंदतिगृहग[illegible]कः पथिकः ११ कस्यापि मातर्धर्मपरेदयांकुरुमपिश्रांते

41

शार्ङ्ग
४१

76

यवैदेशिके शरालिंदककोणकेसुनिभृतंतया [illegible] निशि इत्युक्ते सहसा प्रचंडगृहिणीवाक्येन निर्भर्त्सितः स्कं
धन्यस्तत्पलालमुष्टिविभवः पांथः पुनः प्रस्थितः १२ रविदतस्य भद्रं ते सदृशं यदध्वगशतैः कीर्तिस्तवोद्घुष्यते
स्थाने रूपमनुत्तमं सुकृतिना दानेन करो [illegible] लोक्य भृशं दृशा करुणापाङ्गीतातुरेणास्तुतः पांथेनैकप
लालमुष्टिरुचिना गर्वायते हालिकः १३ [illegible] पि विलासमसृणोल्लसन्मुसललोलदोःकंदलापरस्परप
रिस्खलद्वलयनिःस्वनोद्बंधुराः लसंति [illegible] ती प्रसभकंपितोरस्थलत्रुटद्गमकसंकुलाः कलमकंड कंचुकी
नीगीतयः १४ विज्जकायाः आकर्षन्नि [illegible] न्निव खुरैः पश्चार्द्धमुड्डन्निव स्वं पिबन्निव दिक्चोवापूर्न्समु
द्रमन्निव सागारप्रकरं प्रसन्निव भुवं [illegible] यन्निव ध्वैं खज्ञामरवीज्यमानवदनः श्रीमान्हयो धावति १५
सिंहदत्तस्य पुरोनुन्नः पश्चाद्व्रजति वि [illegible] ततनुः समुत्पन्नोत्तानः पतति पृथ्वि लोकान्विशति ह
यः किं चिज्जघ्ने यदि नयति पति क्वचि [illegible] घातेति भूत्पथचरणघातेन खनति १६ सूक्तिसहस्रात्
आघ्रापाघ्राय गंधं विकटमुखपुटो [illegible] पंक्तिं धावत्युन्मुक्तनादो मुहुरपि च रसादृष्ट्या पृष्ठलग्नः

77

गर्द्दभ्यापादघातद्विगुणितसुरतप्रीतिराक्रुष्टशिश्नो वेगाद्वारूढमुष्यन्नवतरति खरः खंडिते चक्रिरेण १७
मयूरस्य घ्रात्वा श्रोणीमजायाविततमभिमुखं चक्रसंकोचभंगं स्थित्वास्यं निरीक्ष्य प्रविकसितसटो घ
ट्टयन्दन्तमांखुरेण वोवोकारान्प्रकुर्वन्मणीशाकलनिभं चालयेन्नेत्रयुग्मं छागश्छागान्नेकाश्चतुरइव वि
टो मन्मथांधः करोति १८ कस्यापि पार्श्वस्फालावलेपाच्च दुलितचरणोल्लेखिताकाशदेशः संघट्टा
टोपात्कोपकोपप्रकटितरसनापल्लवालीढसृक्कः किंचित्साचीकृतास्यः स्फुरदधरपुटः स्फारिताता॰
पचक्षुर्घोणाघ्राताभिलाषादपसरति तु षंदर्शयन्मेषमेषः १९ शाकवर्मणः ग्रीष्मादित्यकरप्रतप्तसिक
तामध्योपविष्टः सुखं शेते गौरखरो मरुस्थलभुवि प्रोथं निधाय स्थितो गुंजद्ग्राहककंटकाहतमरुच्छूतोत्पत
स्फुलिंगैः छन्नांगः कृकलासकोपि निभृतं मार्तंडमुद्वीक्षते २० मार्गं देहि पदं निधेहि निभृतं तेशावद्धाक
र्णयश्वानं बारयकं दलात्कलकलत्कोपं सखे तावकः इत्यन्योन्यमनेकधामृगवधव्यापारपारंगमैर्व्या॰
धैः कोप्यधिकोरसः प्रतिपदं जल्पद्भिरुत्पाद्यते २१ युष्माकरस्य वामस्कंधनिषण्णशार्ङ्गः कुटिलप्रान्त

र्पिताधोमुखस्कंदच्छोणितलंबमानत्राकानवेणीस्खलच्चामरान् ज्यांतश्चोतकपोतपोतनिपतच्चक्रात्क
तूणीरकान्सोपञ्चपत्करिकुंभभेदजनितास्कंदान्पुलिंदान्सुरः २२ द्वेभेंद्रस्य गर्जन्हरिः सांभसिन्धौलकुं
जेप्रतिध्वनीनात्मकृतान्निशम्य पदववंधक्रमितुसरोषः प्रतर्कयन्नन्यमृगेंद्रनादं २३ भट्टस्वामिनः
लीढव्यस्तविपांडुराग्रनखपोराकर्णदीर्णामुखं विन्यस्याग्निमपोर्युगे चरणयोः सद्योविभिन्नद्विपः एत
स्मिन्मदगंधवलितसटः सावज्ञतिर्यक्कवलन्स्तक्रांताहतिधूतलोलमधुपः कुंजेषु शेते हरिः २४ श्रीभो
मृचांसलिलमुच्चमतां निशीथे तालीवनेषु निभृतं स्थिरकर्णतालाः आकर्णयंतिकरिणोर्द्धनिमीलि
ताक्षाधारारवान्द्रानकोटिनिषण्णहस्ताः २५ कस्यापि नयनपथनिरोधक्रोधनिर्द्धूतभालभ्रमदवि
रलरोमस्तोमवज्ञांधकारः कृमिकचलनलोभोत्खातवल्मीकरंध्रोत्थितफणीफणाघातैरुच्छलत्येष
भल्लः २६ मदत्तस्य यदर्क्कोंत्रुक्रांतस्फुरदरुणपुञ्जोदरधिपापविष्टोनास्तांतः कृशीतमलिडिंभः प्रकु
रुतेकपिः स्थित्वास्थित्वातदिदमनुश्रृण्वन्विचकितोधुनोत्यास्यं रौति प्रचलतिचलत्पुच्छलतिच २७

79

कस्यापि गर्जित्वा मेघधारं प्रथममथ शनैर्मंडलीकृत्य देहं शृंगाभ्यां भावयंतावभिमुखमवनिं दारयंतौ
खुराग्रैः मंदं मंदं समेत्य स्थिरतिहितपदं दंतघातैः सरोषं युध्येते चालयंतौ कुटिलितमसकृत्पुछमेतौ॥
महोक्षौ २८ कस्यापि आहत्याहत्य मूर्ध्ना द्रुतमनुपिबतः प्रस्तुतं मातुरूधः किंचित्कुंचैकजानोरनवरत
चलच्चारुपुछस्य धेनुः उत्तीर्णं तर्णकस्य प्रियतनयतया दत्तहुंकारमुद्राविस्रंसिक्षीरधारालवशबल
मुखस्यांगमातन्ति लेढि २९ मयूरस्य इति श्रीदामोदरसूनुशार्ङ्गधरविरचितायां पद्धत्यां जातिपरिछेदः
षट्त्रिंशः ३६ अथ सदाचारः श्रोत्रियं सुभगां गामग्निं साग्निं धार्मिकं नयं प्रातरुत्थाय यः पश्येदाप
द्भ्यः स प्रमुच्यते १ पापिष्ठं दुर्भगामत्यं नग्नमुत्कृत्तनासिकं प्रातरुत्थाय यः पश्येत्स कलिमवाप्नुया
त् २ प्रेतधूमे विरेके च कांतौ चक्षुरकर्मणि दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते ३ उदक्यापति
तम्लेछचंडालाद्यभिभाषणे मार्जारश्वखरस्पर्शे विण्मूत्रोत्सर्गदर्शने ४ अनुचाक्षणेश्रुपाते च क
लहे श्वासकासयोः रथ्याप्रसर्पणे भंगे क्षुते कर्णमुपस्पृशेत् ५ कुर्यादाचमनाभावे भास्करस्यावलो

कनं स्पृशेद्वासार्द्रतृणगोगोविट्भूदग्निराश्रुती: ६ देवाधिकारिणोम्लेछान्विकर्मस्थान्द्विजानपि विलो॰
क्योपस्पृशेत् स्पृष्ट्वासवासाजलमाविशेत् ७ अजाश्वमुखतोमेध्यंगावोमेध्यास्तुपृष्ठतः ब्राह्मणाःपाद
तोमेध्याःस्त्रियोमेध्यास्तुसर्वतः ८ नास्तियज्ञःस्त्रियाःकिंचिन्नव्रतंनोपवासकः पातुभर्त्तरिशुश्रूषात
यास्वर्गंजयत्यसौ ९ मृतेभर्तरिपानारीब्रह्मचर्येव्यवस्थिता मृतासालभतेमोक्षंभर्त्तारंपातुगछति
१० तिस्रःकोट्योर्द्धकोटीचपानिलोमानिमानुषेः तावत्कालंवसेत्स्वर्गेभर्तारंपानुगछति ११ व्या॰
लग्राहीयथाव्यालंविलादुद्धरतेवलात् एवंपतिंसमुद्धृत्यनारीस्वर्गेषुमोदते १२ पृथक्छितांसमाह
ख्वनविप्रागंतुमर्हति भर्त्तदेहेनयायातितस्यालोकाःसनातनाः १३ शुचिभूमिगतंतोयंशुचिर्नारीप
तिव्रता शुचिर्द्धर्मकरीराजासंतोषीब्राह्मणःशुचिः १४ नित्यमास्यंशुचिस्त्रीणांशकुनिःफलपातने॥
वत्सोपिस्तनपानेनश्वामृगग्रहणेशुचिः १५ गछेद्देशान्नपंथानंस्वयंनोपानहोहरेत् शिरसानव
हेद्भारंनप्रधावेतवर्षति १६ नस्नानमाचरेद्भुक्त्वानातुरोनमहानिशि नवस्त्रैसहनाजस्त्रंनाविज्ञाते

८।

जलाशये १७ नयापद्यत्सरिद्व्यंषुंपद्मावर्त्तसंन्वितं गतप्रत्यागतंपश्चात्ततोयंपरिवर्जयेत् १८ ब्राह्मणपश्चा
गोमहिष्यःसूताःशुष्काःनवोदकाःनद्यःशुद्धादशाहेनशुद्धापोभूमिगानवा १९ प्रवहत्ब्राह्मणात्तोयंत
डागेद्वात्रिपोदकं वापीकूपगतंवैत्र्यंशूद्रंचगृहभांडगं २० अप्स्वात्मानंनवीक्षेतनावगाहेत्पयो
रयं संदिग्धनावंनारोहेत्नवाहुभ्यांनदीतरेत् २१ शीतास्वप्सुनिषिच्योष्णाःमंत्रसंभारसंभृताः।
स्नानंगृहेषुकुर्वाणःप्राप्नोतिस्नानजंफलं २२ नाग्निंमुखेनोपधमेत्नाधःकुर्यात्नलंघयेत् ना
मेध्यंप्रक्षिपेदग्नौनचपादौप्रतापयेत् २३ देवालयंचत्वरंचनक्रंसेवेतनदुमानशून्याटवीशून्य
गृहंश्मशानंचदिनेष्वपि २४ जलंपिबेन्नांजलिनाशापानेनप्रबोधयेत् परान्नवाचरंतोगांधये
तांरनिवारयेत् २५ श्रप्पाद्दीपाधमस्तंभाघ्राणांदूरेणसंत्यजेत् मर्मात्नायंनकुर्वीतधीमानसहने
सह २६ नोर्द्धजानुश्चिरंतिष्ठेत्नस्याउत्कटासनः ननासिकंविकुष्णीयात्नस्वयंकर्तयेत्नखान् २७
सर्वथासंत्यजेद्वादंनकिंचित्मर्मणिस्पृशेत् सर्वान्परित्यजेदर्थान्स्वाध्यायस्यविरोधिनः २८ कु

ग॰ड॰
४४
44
82

शंखवर्णांसदाधार्यंवह्निर्मोल्यंनधारयेत् नागंधंविभृयात्पुष्पंनात्मार्थंगुंफयेत्स्रजं नित्यमामलकेलक्ष्मीर्नित्यं
हरितेगोमये नित्यंश्रीःखेचपद्मेचनित्यंशुक्लेचवाससि ३० बालार्कंप्रेतधूमंचवृद्धास्त्रीपल्वलोदकं आ
युःकामोनसेवेतरात्रौचदधिभोजनं ३१ नोत्संगेभक्षयेन्नास्यनौलिंभूमिंनसंस्पृशेत् क्वचिद्गच्छेन्नचो
च्छिष्टःपश्येज्ज्योतींषिनाशुचिः ३२ ब्राह्मणोब्रह्मतीर्थेनविरङ्घ्रिःसमुपस्पृशेत् कुर्वन्नाचमनंविष्णुमों
कारंचापिसंस्मरेत् ३३ हस्तद्वयस्थितैर्दर्भैःसमाचामेतयोद्विजः सोमपानफलंतस्यभुक्त्वायज्ञफले
लभेत् ३४ गृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनात् मांसादोन्येपिमांसस्यत्यागात्स्वर्गेव्रजेद्ध्रुवं ३५ १
आत्मार्थंयःपशुंहन्यात्सोवश्यंनरकंव्रजेत् देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदोषभाक् ३६ अन
भिध्यायेत्स्वविषुसर्वेसत्वेषुसौहृदं कर्मणांफलमस्तीतिमनसात्रितयंचरेत् ३७ प्राणातिपातस्तैन्यंचप
रदाराभिमर्षणं त्रीणिपापानिकामेननित्यसः परिवर्जयेत् ३८ असत्प्रलापःपारुष्यंपैशुन्यमनृतं
तथा चत्वारिवाचाराजेंद्रनजल्पेन्नचचिंतयेत् ३९ अहिंसासत्यवचनंसर्वभूतानुकंपनं शमोदानंय

83

यथाशक्तिर्गार्हस्थ्यो धर्म उच्यते ४० देवान्पितॄन्मनुष्यांश्च भृत्यानागतांश्च देववत्ता: भोजयित्वा तत: पश्चा
द्गृहस्थो भोक्तुमर्हति ४१ वृद्धांश्चित्वा महीं भित्वा हत्वा कीटपिपीलिकान् दत्वान्नं कार्मुकेऽर्थिभ्य:॥
सर्वपापै: प्रमुच्यते ४२ राज्ञे दत्वा तु षड्भागं देवतानां च विंशतिं त्रिंशद्दत्वा च विप्राणां कार्मुको नावसी
दति ४३ चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृतं उत्थाय चासनं दद्यादेष धर्म: सनातन: ४४ तृणा
नि भूमिरुदकं वाक्चतुर्थी च सूनृता सतामेतानि हर्म्येभ्यो नोच्छिद्यंते कदाचन ४५ ग्रासादर्द्धमपि ग्रा
समर्थिभ्य: किं न यच्छति इच्छानुरूपो विभव: कदा कस्य भविष्यति ४६ उष्णकाले जलं दद्याच्छीतकाले
कृतासनं प्रावृट्काले गृहं देयं सर्वकालेषु भोजनं ४७ अहन्ति व्याधिशोकार्त्तान् अनुवर्तेत शक्तित:॥
आत्मवत्सततं पश्येदपि कीटपिपीलिकां ४८ गां पंकाद्ब्राह्मणीं दास्याद्बलिंलोपाद्विजं वधात् मोच
यन्मुच्यते जंतु: पापाद्वा मरणांतिकात् ४९ न कश्चिदपि जानाति किं कस्य श्वो भविष्यति अत: श्व: क
रणीयानि कुर्याद्द्यैव बुद्धिमान् ५० अनेन मर्त्यदेहेन परलोकं ह्ययत्नात्मेदं विचिंत्य तदनुष्ठेयं हेयं कर्म

ततोन्यथा ५१ उपकारः परो धर्मः परार्थः कर्मनैपुणं पात्रे दानं परः कामः परो मोक्षो वितृष्णता ५२
अंजनस्य क्षयं दृष्ट्वा वल्मीकस्य तु संचयं अवंध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ५३ दीपोपशा
मनं पुंसां कूष्मांडछेदनं स्त्रियः अचिरेणैव कालेन कुलक्षयो भवेद्ध्रुवं ५४ अलाबुवर्तुलाका
रं वृंताकं कुंदसंनिभं प्राणांतेपि न चाश्नीयात्मसूरान्नं सवल्कलं ५५ परदारा न गंतव्याः सर्वव
र्णेषु कर्हिचित् नहीदृशमनायुष्यं त्रिषु लोकेषु विद्यते ५६ मात्रा स्वस्रा दुहित्रा वा न विविक्तास
नो भवेत् बलवानिंद्रियग्रामः पंडितोप्यत्र मुह्यति ५७ प्रकीर्णकेशामनवेक्ष्यकारिणीं सदा च भर्तुः
प्रतिकूलभाषिणीं परस्य वेश्माभिरतामपत्रपामेवंविधां योषितमाशु वर्जयेत् ५८ हृताधिकारां
मलिनां पिंडमात्रोपजीविनीं परिभूतामधःशय्यां वासयेद्व्यभिचारिणीं ५९ कुचैलिनं दंतमलाप
धारिणं बह्वाशनं निष्ठुरवाक्यभाषिणं सूर्योदये चास्तमये च शायिनं विमुंचति श्रीरपि चक्रपाणि
नं ६० एकच्छागं द्विगोवेयं त्रिगवं पंचमाहिषं षडश्वं सप्तमातंगं शक्रस्यापि श्रियं हरेत् ६१ त्रिरः

सुधौतं चरणौ सम्प्रतिर्मलौ वरांगनासेवनमल्पभोजनं अनग्नशायित्वमपर्वमैथुनं चिरं प्रणष्टां श्रियमानयंति षट् ६२ षष्ठीषु तैलं पलमष्टमीषु क्षौरक्रियां चैव चतुर्दशीषु स्त्रीसेवनं नष्टकलासु पुंसामायुः क्षयार्थं मुनयो वदंति ६३ स्नातुर्जनस्य दशमी स्तनपास्त्रयोदश्यपथ्यं निहंतुमयमेतदपि द्वितीया सप्तम्यनिंदुनवमीषु च संपदिच्छुः स्नायात् कदाचिदपि नामलकैर्मनुष्यः ६४ रोहिणीसहितमुत्तरात्रयं कीर्तयंति मुनयो ध्रुवाह्वयं बीजकर्मनगराभिसेचनारामशांतिविधिषु प्रशस्यते ६५ रोहिणीषु करपंचके श्विभे त्युत्तरेपि च पुनर्द्वसुद्वये रेवतीषु वसुदैवते च भेनव्य.वस्त्रपरिधानमिष्यते ६६ रविर्नृपविलोकने सुरगुरुर्विवाहोत्सवे रणो धरणिनंदनो भृगुसुतः प्रयेणो वल्लीशनिस्तमखदीक्षणो सकलशास्त्रबोधे बुधः शशी निखिलकर्मसु ध्रुवमुदाहृतः सूरिभिः ६७ एतामिधर्मशास्त्रपुराणज्योतिःशास्त्रेभ्यः इति श्रीदामोदरसूनुश्रीधरविरचितायां पद्यत्पासदाचारपरिच्छेदः सप्तविंशः अथ धर्मविवृतिः ऊर्द्धवाहुर्विरौम्येष न कश्चिच्छृणोति मे धर्मादर्थश्च कामश्च स किमर्थं

नसेव्यते १ यस्य धर्मविहीनस्य दिनान्यायांति यांति च स लोहकारभस्त्रेव श्वसन्नपि न जीवति २ परदा
रपरद्रोहपरद्रव्यपराङ्मुखः गंगाप्याह कदागत्य मामयं पावयिष्यति ३ उत्थायोत्थाय बोधव्यं कि
मद्य सुकृतं कृतं आयुषः खंडमादाय रविरस्तं गमिष्यति ४ केषामप्येते अजरामरवत्प्राज्ञो
विद्यामर्थं च चिंतयेत् गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ५ श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवाव
धार्यतां आत्मनः प्रतिकूलानि परेषां न समाचरेत् ६ एतौ व्यासस्य परलोकहितं तात प्रातरुत्था
य चिंतयेत् इह ते कर्मणां पूर्वो विपाकश्चिंतयिष्यति ७ मदालसायाः श्रीदो धनार्थिनां धर्मः कामि
नां सर्वकामदः धर्मोपध्यापवर्गस्य पारंपर्येण साधयेत् ८ यज्ञाध्ययनदानानि तपः सत्यं धृतिः क्ष
मा अलोभ इति मार्गोयं धर्मस्याष्टविधः स्मृतः ९ आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवः प्रीतिः प्र
सादो माधुर्यं मार्दवं च यमा दश १० भावशुद्धिर्मनुष्यैस्तु कर्तव्या सर्वकर्मसु अन्यथालिंग्यते कांता
अभावे दुहितान्यथा ११ कृत्वापि पातकं कर्म पो दद्यादन्नमर्थिते ब्राह्मणाय विशेषेण न स पापेन

87

लिप्यते १२ आत्मज्ञानान्निवर्ततेज्ञातयःसहबांधवैः त्वमापेनैवगंतव्यंतत्कर्मसुकृतंकुरु १३ के
षामप्यते धर्मैरतिर्भवतुनःसततोच्छ्रितानांसहैकएवपरलोकगतस्यबंधुः अर्थास्त्रियश्चनिपुणोरि
हसेव्यमानानैवाप्तभावमुपयांतिनचस्थिरत्वं १४ कस्यापि यावत्स्वस्थमिदंसरीरमरुजंयावज्जरा
दूरतोयावच्चेंद्रियशक्तिरप्रतिहतायावत्क्षयोनायुषः आत्मश्रेयसितावदेवविदुषाकार्यःप्रयत्नो
महानादीप्तेभवनेतुकूपखननंप्रत्युद्यमःकीदृशः १५ भर्तृहरेः धर्माज्जन्मकुलेशरीरपटुतासौभा
ग्यमायुर्धनंधर्मेणैवभवंतिनिर्मलयशोविद्यामहीसंपदः कांतारेषुमहाभयेषुसततंधर्मःपरित्रा
पतेधर्मःसम्यगुपासितोभवतिहिस्वर्गापवर्गप्रदः १६ कस्यापि पन्नागामदभिन्नगंडकरटास्ति
ष्ठंतिनिद्रालवोद्वारेहेमविभूषिताश्चतुरगदेष्यंतियदर्प्पिताःवीणावेणुमृदंग[illegible]शंखस्वपणवैःसुप्त
श्चयद्बोध्यतेतत्सर्वंसुरलोकराजसदृशंधर्मस्यविस्फूर्जितं १७ कस्यापि गंगाङ्गेदेकुरुक्षेत्रेविश्रां
तोमपिकर्णिकेवेणीगयायामौकारेस्नात्वादत्वासुखीभवेत् १८ शरणागतरक्षार्थंस्त्रीगोद्विजहि

श्रा॰ कृ॰
४७

तायच स्वाम्यर्थेषसत्यजेत्प्राणांस्तस्यलोकाःसनातनाः १९ योनकामान्नसंरंभान्नद्वेषाद्धर्ममुत्सृजेत् यथो
क्तकारीसौम्यश्चसमुस्वंमृत्युमिच्छति २० यज्ञदानतपस्तीर्थसेवाभिर्विजितेंद्रियः भौमेषुचांतरिक्षेषुस्वर्गे
षुमनुजोव्रजेत् २१ वसंतिसुरलोकेषुनिजपुण्येनयेनराः विमानैर्विविधाकारैःसर्वकामसमृद्धिभिः २२
तेभ्यश्चप्रच्युताराज्ञामन्येषांचमहात्मनां जायंतेसुखिनांगेहेसद्वृतपरिपालकाः २३ गायंतिदेवाः
किलगीतिकानिस्वर्गापवर्गस्यचहेतुभूताः धन्यास्तुतेभारतभूमिभागेभवंतिभूयःकृतिनःसुरत्वात् २४
पुनःकृत्वाद्भुतंकर्मपूर्वाभ्यासेनमानवाः सुरलोकंप्रयांत्येवभाग्यवंतोजितेंद्रियाः २५ परात्परतरंयां
तिनारायणपरायणाः नतेतत्रगमिष्यंतियेद्विषंतिमहेश्वरं २६ वासुदेवेमनोयस्यजपहोमार्चना
दिषु तस्यांतरायोविज्ञेयोदेवेंद्रत्वादिकंफलं २७ गत्वागत्वानिवर्तंतेचंद्रसूर्यादयोग्रहाः अद्यापि
ननिवर्तंतेद्वादशाक्षरचिंतकाः २८ षडक्षरेणमंत्रेणपुष्पमेकमपिस्वयंलिंगस्यमूर्ध्नियोदद्यात्स
भूयोपिनजायते उपोष्यैकादशीसर्वास्तथाकृष्णाश्चतुर्दशीः ध्यात्वाहरिहरंदेवंप्राप्नोतिपरमंपदं ३०

89

मोहादवाचीमनुजाः प्रतीचीं प्राचीमुदीचीमपि पर्यटंति सच्छिन्नमयेमानस एव तीर्थे स्वच्छे सुखं स्नातुमयारयंतः ३१ इति श्रीदामोदरसूनुशार्ङ्गधरविरचितायां पद्धत्यां धर्मविवृतिपरिच्छेदः त्रयस्त्रिंशः अथ पातकविवृतिः कथं ते तल्पकसद्धत्नाः सुखं रात्रिषु शेरते मरणांतरितायेषां नरके षु वि

पतयः १ कतिपयदिनपरमायुषि मदकारिणि यौवने दुरात्मानः विदधति तथापराधं जन्मैव यथा हृथा भवति २ श्रीधनदेवानां व्याधिर्वित्तविनाशः प्रियविरहो दुर्भगतत्वमुद्वेगः सर्वत्राज्ञा भंगः स्फुटं भवत्यकृतपुण्यपापानि मिहैव फलमाप्नुते ५ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा निःकृतिर्विहिता लोके कृतघ्ने नास्ति निःकृतिः ८ ऋतुस्नातां च यो भार्यां नैव गच्छति मूढधीः घो रायां ब्रह्महत्यायां युज्यते नात्र संशयः १० अदुष्टां पतितां भार्यां मूढो यस्तु परित्यजेत् सप्तजन्मानि सस्त्रीत्वं लभते नात्र संशयः ११ रौरवं कूटसाक्षी तु याति पश्चानृतं वदेत् कुंभीपाके प्रयात्येवमा नवा गुरुतल्पगाः १२ मार्कंडेयात् स्त्रीबालस्वामिमित्रघ्नगोघ्नविश्वासघातिनः सुरापो ब्रह्महा चौ

48

90

शेपांस्त्येते सर्वनारकान् १३ असत्प्रतीगृहीता वा नरके पात्यधोमुखे एको मिष्टान्नभुग्यः स याति एव व
हे नरः १४ आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः रुधिरांधे पतंत्येते सोमविक्रयिणाश्च ये १५
मधुहा ग्रामहंता च याति चैतरणीं नरः असिपत्रवनं याति दर्पाद्धननिकृंतनः १६ मृगघ्नागादिहं
ता च वह्निज्वाले निपात्यते व्रतलोपात्मभम्रष्टो पातितस्संदंशनारके १७ कृते पापेनुतापो वै यस्य
पुंसः प्रजायते प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परं १८ एते विष्णुपुराणात् भूतारीकांचगवाह
त्वा तु नारकान् तृणगुल्मलतावल्लीत्वक्सारतनुतां लभेत् १९ सर्वपातकसंयातकक्षदावानलं
परं गोविंदनामकथनं गंगास्नानं च मे मतं २० मुकुंद दामोदर वासुदेव श्रीकांत चक्रायुध कृष्ण
विष्णो गोविंद नारायण पद्मनाभ त्रिविक्रमानंत हरे नमस्ते २१ शार्ङ्गधरस्यैतौ तदस्य मुहूर्तं वापि
शीतमुष्णं यथापि वा गांगं पयः पुनात्येव पापादामरणांतिकात् २२ कस्यापि त्यज दुर्जनसंसर्गं भज
साधुसमागमं कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यतां २३ कस्यापि स्वपुरुषमभिवीक्ष्य पात्राहस्तं

91

वदंतियमः किलतस्यकर्णमूले परिहरमधुसूदनप्रपन्नाप्रभुरहमन्यनृणांनवैष्णवानां २४
विष्णुपुराणात् रामंदूर्वादलश्यामंपद्माक्षंपीतवाससं स्तुवंतिनामभिर्दिव्यैर्नतेसंसारिणोनराः
२५ पद्मपुराणात् इतिश्रीदामोदरसुनुशार्ङ्गधरविरचितायांपंचत्रिंशत्यानकविहृतिपरिच्छेदः एको
नचत्वारिंशः ३९ अथखेचरभूचरेषुपूर्वंसूर्यान्योक्तयः रवेरेवोदयःश्लाघ्यःकोन्येषामुदयाग्र
ग्रहः नतमांसिनतेजांसियस्मिन्नभ्युदितेसति १ खद्योतोद्योततेतावद्यावन्नोदयतेशशी उदिते
तुसहस्रांशौनखद्योतोनचंद्रमाः २ तस्यैवाभ्युदयोभूयाज्ज्ञानोयस्योदयेसति विकासभाजोजा
यंतेगुणिनःकमलाकराः ३ केषामप्येतेदेवोहरिर्वहतुवक्षसिकौस्तुभंतमन्यैवकाचनपुनर्घु
मणेःप्रतिष्ठापत्यादसंभिततरंगितसौरभाणिधत्तेसएवसिरसासरसीरुहाणि ४ महादेवस्य उ ६३
घंत्वमूनिसुबहूनिमहामहांसिचंद्रोप्यलंभुवनमंडलमंडनाय सूर्यादृतेनतदुदेतिनचास्तमे
तियेनोदितेनदिनमस्तमितेचरात्रिः ५ करान्प्रसार्यरविणादक्षिणाशावलंबिता केवलमनेना

त्मादिवसोपिलघूकृतः ६ निमीलनायपद्मानामुदयायत्यतेजसां तमसामवकाशायव्रजत्यस्तमसौरविः
७ येनोन्मथ्यतमांसिमांसलघनस्पर्द्धीनिसर्वाजगच्चक्षुष्मत्परमार्थतः कृतमिदं देवेनतिग्मत्विषा त
स्मिन्नस्तमितेविवस्वतिकियान्करोजनोदुर्जनोपद्मध्यातिधृतिंत्रासांकत्राकलाल्लोकेप्रदीपेथवा ८
केयामप्येते प्रातःपूष्णोभवतिमहतेनोपतापापयस्मात्कालेनास्तंकदहनगतायांतिपास्यंतिचा
न्ये एतावतुव्यथयतिसदालोकंवाध्येस्तमोभिस्तस्मिन्नेवप्रकृतिमहतिव्योम्निलब्धावकाशः ९
गतेतस्मिन्भानौत्रिभुवनसमुन्मेषविरहव्यथांचंद्रोनेष्यत्यनुचितमितोनास्तिकिमपि इदंचेत
स्तापंजनयतितरामंत्रयदमीप्रदीपाःसंजातास्तिमिरहतिवद्धोहरशिखा १० एतौमभल्लमहस्व
यत्यादाःशिरसानकेनविधृताः पृथ्वीभृतांमध्यतस्तस्मिन्भास्वतिराहुणाकवलितेलोकत्रये
चक्षुषिखद्योतैःस्फुरितंतमेभिरुदितंताराभिरुज्जृंभितंघूकैःकृत्यितमाःक्रीमत्रकरवैकिंकि
नकैश्चेष्टितं ११ इतिश्रीदामोदरसूनुशार्ङ्गधरविरचितायांपद्धत्यांसूर्यान्योक्तिपरिच्छेदश्चत्वारिंशः ४०

अथचंद्रान्योक्तयः आलोकवंतः संत्येवभूयांसोभास्करादयः कलावानेचग्रावग्रावा
कर्मरिणकमेठः १ प्रह्लादनस्य देवाघघपितुल्योभृङ्कूतेशस्यपरिग्रहुः तथापिकिंचपाल्ला
नितुलांयांतिकलानिधेः २ भवभृतः अहोनक्षत्रराजस्यसाभिमानंविचेष्टितंपरिक्षीणस्यव
क्रत्वेसंपूर्णस्यतुवृत्तना ३ हरमुकुटेसुरतटिनीकटस्थितिलोभतोद्विजेंद्रेण अपिगरलफ
णिभृत्फूत्कृतिरीत्तणानीदूणशुघुत्ताणिहांतः ४ निजकरनिकरसमृद्ध्याधवलयभुवनानि
पार्वणप्रोष्णकसुचिरंहंतिनसहतेहतविधिरिहसुस्थितंकमपि ५ उडुगणपरिवारोनायको
प्योषधीनाममृततपयश्शरीरः कांतियुक्तोपिचंद्रः भवतिविकलमूर्त्तिर्मंडलंप्राप्यभानोः परसद
नानिविष्टः कोलघुत्वंनयाति ६ प्रथमदिवसचंद्रः सर्वलोकैकवंद्यः सतुषकलाभिः पूर्णविंबो
पिनार्हः अतिपरिचयदोषः कस्यनोहेतिमानंनवनवगुणरागीप्रायशः सर्वलोकः ७ शिर
साधार्यमाणोपिसोमः सोम्येनशंभुना तथापिकृशतांधत्तेकष्टखलुपराश्रयः ८ व्यज्यमा

नकलंकस्येन्दोर्कलानिधेः आधास्महे वयं सर्वं सर्वम्लाघां कस्मादशं ॥ ९ ॥ केषामप्येतेन
सनमसि जनार्दनस्य शंभोर्मुकुटमणिः सुदर्शनस्त्वमादिदेवः त्यजसि न मृगमात्रमेकमिंदो विं
रमति येन कलंककिंवदंति १० उमापतिधरस्य यद्यपि शिरोधिरोहति रौद्रः क्रोधेन सिंहिकातन
यः त्यजति न शरणं यातं सागरसूनुर्मृगं न दपि ११ श्रीमदनस्य क्षीणः समीपत्वं पूर्णः पूर्णो
तिहरतां उपेति मित्राघ श्वद्रो युक्तं तन्मलिनात्मनः १२ यज्जातोसि पयोनिधोहरजटाजूटप्र
तिष्ठोसि यद्विष्णुसोदरदीपकोसि विधिना सृष्टोसि यद्धामभिः तैः भ्रातः प्रीतमस्त्वं अधुना म्ला
नीकृतं तत्त्वया राजीवं यद्दयास्य केरवकुलं नीतं विकाशास्पदं १३ लब्धं जन्म सह श्रिया स्वयमपि
त्रैलोक्यभूषाकरः स्थित्यर्थं परमेश्वरोभ्युपगतस्तेनापि मूर्द्धांध्वनतः वृद्धिं क्षीनकरस्तथापि नग
तः क्षीणः परं त्वम्प्लुतश्चायः प्राकृतमेव कर्म यलवत्कः कस्य कर्तुं क्षमः १४ पादन्यासं क्षितिधरगु
रोर्मूर्ध्नि कृत्वा सुमेरोः क्रांतं येन क्षपिततमसा मध्यमं धाम विष्णोः सोयं चंद्रः पतति गगनादल्पशे

95

षैर्मरखैर्हरारोहो भवति प्रहतामप्यपभ्रंशहेतुः २५ कान्तिदासस्य पीएसंवचपुषोस्पहे तुरुदयोवि
ष्वस्य नेत्रोत्सवः लुप्तभानुकरैरिदं त्रिभुवनं ज्योत्स्नाभरैः सिंचति सर्वाशाप्रतिरोधकां ध्वजमस्य ध्वं२
सायवक्त्रो घर्मे धिग्धातारमिहापि लक्ष्मलिखितुं पस्य प्रवृत्तं मनः २७ कस्यापि विरमतिमिरसाह
सादमुष्माद्यदिरविरस्तमितः स्वात स्तताकिं कलयसि न पुरो महो महोर्मिर्द्युतिनिधिरभ्युदयस
पंशशांकः वल्लालसेनस्य उद्वैस्यानकृतोदपैर्वृद्धविधैर्ज्योतिर्भिहघस्त्रभैरुग्राकाथैः किममी
भिरत्रवितप्यां प्रोद्दिंदधानैरपिपाहृत्रोकतमोपहेन भवता लक्ष्मीर्न्नविस्तीर्यते तावत्स्वंद्रकपंत्रया
तिपरमां वृद्धिं सरत्नाकरः २८ त्रिलोचनदासस्य इति श्रीदामोदरस्तनुश्रीधरविरचितायां पद्य
सौचंद्रान्योक्तिपरिच्छेदएकचत्वारिंशः अथमेघान्योक्तयः एकस्य न समन्ये धन्यामभ्युन्नतिं ज
लधरस्य विश्वस्त जैल्लकानमानन मवलोकते यस्य १ प्रद्युम्नदनस्य संप्रतिनकल्पतरवोनसिद्धयो
नापि देवता वरदाः जलद त्वयि विश्राम्यति सकलमियं भुवनलोकस्य वस्कपालस्य सरणदृष्टनस्य

श्रा
96
५९

तद्वित्तोनिजसंपत्तेःपयोदनिवहेनज्ञातंसाधुयदुचितंभ्यर्चनेभ्योवितरताचारि ३ कस्यापि प्रावृषे
एपस्यमालिन्यंदोषःकोभीष्टवर्षिणःशरदभ्रस्यपशुभ्रत्वंवदकुत्रोपयुज्यते ४ जलधरजलभरनि
करैरपहरपरितापमुग्रतंजगतःनोचेदपरसरहरंहिमकरदर्शनवितर ५ चंद्रवेः चातकःस्वा
नुमानेनजलंप्रार्थयत्तेवुदान्तस्यौदार्यतयासर्वभ्लाव्यपतंवुनामहो ६ शैलेयेषुशिलातलेषुच
गिरेःश्रृंगेषुगर्तेषुच श्रीखंडेषुचविभीतकेषुचतथाश्लेषुरिक्तेषुच स्निग्धेनध्वनिनाखिलेषु
जगतिचक्रेसमंवर्षतेवंदेवारिदसार्वभौमभवतोविश्वोपकारिव्रतं ७ कस्यापिनीहारकरसार
सागरसलिलरत्क्यसारनीरश्रियंतत्पत्नीतोयदचातकेनमहतीसेवासमालंचिता तस्यत्फलितंस
मुरुशिलाशिलासंताडनंमस्तकेगाढंगर्जसिवज्रंजसितडिल्लेखाभिरातर्जसि ८ कस्यापि हंसाः
संतिसहस्रशःस्वभरणव्यापारमात्रोद्यताःस्वार्थोपिपरार्थएवसपुनेकःसतामग्रणीःदुष्पूरोद
रपूरणायपिवतिस्रोतःपतिंवाडवोजीमूतस्तुनिदाघसंभृतजगत्संतापविच्छित्तये ९ कस्यापि

मु
५९

९७

चंदनतरोर्महनीयमर्त्तैः सेकार्यमुत्सहतितन्डुणवद्गुत्सः धाराखोटकस्यञ्जनरसमहाघ्रायोपमंभो
दएवशरणंयदिनिर्गुणस्य १० कस्यापि अपेहेलावेलातुर्गतकुलशैलेजलनिधौकुतोवारए
मोघंवतजलदमोघवितरसिसमंताद्गतालज्ज्वलदनलकीलावलनकमोपेतानेतानुपचरयोभि
विटपिनः ११ विद्रुमकरणस्य मार्गेभरिमहज्जरलस्थलभुविस्वपेपिनोलभ्यतेतोझोवातिसमीर

लि २

णः क्वचिदछायापाभ्रतोनद्रुमाः अंगारप्रकरान्किरन्नपिरविर्ग्रीष्मेतपत्यंचरेतद्भोः याप्यहितापए

पि ५

रपधरांपाप्योदयोभरैः १२ शार्ङ्गधरस्य भेकैः कोटरशायिभिर्मतमिवक्ष्मांतर्गतंकच्छपैः पाठी
नैः पृथुपंकपीठलुलितैर्यस्मिन्मुहुर्मूर्छितं तस्मिन्नेवसरस्यकालजलदेनोन्नम्यतत्कृतये
नांतर्धिनिमग्नवन्यकरिणांयूथैःपयःपीयते १३ आकालजलदस्य आश्वासयपर्वतिकलंत
बंधनाप [illegible] तुषारणः डे [illegible] ध्वामिहांतरेकीदृक् ७७ वल्लभस्य अथकंटकारिका उचितंनामनारि
ज्यांकेतक्यामपिकंटकाः रसगंधोज्झितेकिंतेकंटकारिके ७८ अथधत्तूरः महेशस्त्वांधत्तेशिरसि
रसराजस्यजयिनीविशुद्धिस्त्वत्संगात्कनकमयतेतत्रिभुवनेनंतनोतित्वत्सेवानतुकनकदत्त्वदपरः
परस्तत्कोनुस्याद्यदिनमुलभीभावमभजः ७९ भल्लादनस्य अथपत्रणानि उतुंगैस्तरुभिः किमेभि
रखिलैशाखाप्रसंस्पर्द्धिभिर्धन्योसौनितरामुलुपविटपानघास्तटेवस्थितः एवंयः कृतबुद्धिरुद्धतजलव्या
लोलवीचीवशान्मज्जंतंजनमुद्धरामिसहसातेनैवमज्जामिच ८० गणकस्यरूदस्यासंधुतदमनुगतस्य
तशास्यापिजन्मकल्याणं यत्सलिलमज्जोदाकुलजनस्यहस्तावलंबनंभवति ८१ वल्लभस्य अथपत्तांबूलव

७१

149

क्षीणां कतिन स्फुरंति परितः पत्राणि कि[illegible]तैरिह स्निग्धैरप्यतिकोमलैरपि निजामेवाश्रयद्भिः श्रियं तानेव त्वं कमहे महाजन
मुरव्यश्रीकारि जन्मना तात्यान्स्तेन वनागरप्रियतमांस्तांस्त्वं न वक्षीष दाम् ८२ किं वीरुधो भुवि न संति सहस्रशोन्यास्तासां दलानि न
परोपकृतिं भजंति एकैव वल्लिषु विराजति राजवल्ली या नागरीवदनचंद्रमलंकरोति ८३ अथ तुंबीसंवीक्ष्य वः समकटुरसास्तुंबि वल्ली
प्रसूनास्तासां वा अपि कापि यपादुस्तरं तारयंति शल्यायं नेसरसमयराः शुष्ककाष्ठे विलग्नास्तन्मध्ये माज्वलितहृदयाः शोणितं संपिबंति ८४
इति श्रीशार्ङ्गधरपद्धतौ वृक्षविशेषान्योक्तिपरिच्छेदः सप्तपंचाशत्तमः ५७ अथ पर्वतान्योक्तयः विंध्यं मंदिरसुमेरुमरुत्थतायत्यतिस्तुहिन
पर्वतो भवतु इश्वरश्च सुरताश्रभावतत्त महुवं जगति जं भतेयश्रीः १ शार्ङ्गधरस्य येसंतोषसुखप्रबोधमनः समस्तेषां न भिन्नामुदोपेध्य
व्योधनलोभसंकुलाधिमुक्तेषां तु दूरेन्यरगां इत्थं कस्य कृते कृतः सविधिना ताद्धक्पदं संपदां स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मेरो
चते २ विंध्यापतेः श्रावणे हे वत किमघतनीमवस्थां तस्याद्य विंध्यशिखरस्य मनोहरस्य यत्रैव सप्तमुनयस्तपसा निषेदुः सोपं
किलाघवसतिः पिशिताशनानां ३ किं तेन हेमगिरिणा रजताद्रिणा वा यत्राश्रिताश्च तरवस्तरव एव मन्यामहे मलयमेव यदाश्र
येण शाखोटनिंबकुटजान्यपि चंदनानि ४ मुरारातिर्लेदंमी त्रिपुरविजयी शीतकिरणं करीडं पौलोमीपतिरपि चलेभज

150

लनिधेः त्वया किं वा लब्धं क॰ यया मय्य तो मंदरगिरेः प्राप्तरागः शैलानां यदयमदयमदयं रत्ननिलयः ५ प्राक्कादराद्विपदिपक्षयुगं
तथापि मैनाकसंततिस्तव नेहगतानि निःसत्वता च निरपत्रपता च किं तु याथो निधौ निपतता भवता र्जिता त्र ६ एकस्मामनुधेति
मूर्द्धनि गिरेरन्यस चैष क्रमाद्दत्तं याति कलानिधिस्तदुभयोरत्नप्रसस्ता चलः को नामोदयिनं करोति न शिरोमाणिका ८८
मत्तं पुनर्यातियः कुरुते भवानिवसदुःप्रायोस्ति पृथ्वीतले ७ रोहणाचलशैलेषु कस्तलां कलयेत तव यस पाषाण
खंडानि मंडनानि महीभृतां ८ प्रह्लादनस्यापरं नानानां न किमालयो जलनिधिः न स्थिरा मेदिनी किं न व्योम मरुत्वं दसु
त रुतिनां किं नाम नैवोन्नहं होरोहणं किं न याचकचमू निःसंकटं कांत तितिं ता तिस्वीकरणेन गोत्रतिलक त्रैलोक्य वंद्यो भवान्
६ नाधन्यानां निवासं विदधाति गिरयः शेषराभूतचंद्राः श्रृंगौ ज्योत्स्ना प्रवाहं हुतमिव तु हिने दिक्षु खेषु द्विपंतः ये
षामुद्वेल्लरू स्मामविहत्त गतिनावायुना कंपितानां नामाका प्रो विप्रकीर्णः कुसुमचय इवा भाति तारागृ
होघः १० इति श्रीप्राङ्गधरपद्धत्यां पार्वतान्योक्तिपरिच्छेदः अष्टपंचाशत्तमः ५८ अ ७८
प्यागस्त्यान्पोरूपः कपंते गिरयः पुरंदरभिया मैनाकमुख्याः पुनः स्कंदं स्पंबुधः ॥ ॥ ॥ ॥

151

गः स्फुरंतिवडवावक्त्रोद्भूतावह्नयः भोःकुंभोद्भवमुच्यतांजलनिधिःस्वस्त्यस्तुतेसांप्रतंनिद्रा

लुःश्लथवाहुवल्लिकमलाश्लेषोहरिःसीदति १ अखर्वगर्वगर्त्तोस्यविछिन्नोयस्यवारि

धिः हासएवमुनेःप्राणिरधस्ताद्विंध्यभूभृतः २ अल्पीयसैवपयसायत्कुंभःपूर्यतेप्रसि

द्धंतत् भ्रामयंतेजःपश्यतकुंभोद्भूतःपपौवार्द्धिं ३ इतिश्रीशार्ङ्गधरपद्धत्यांअगस्त्यान्यो

क्तिपरिछेदः एकोनषष्टितमः ५८ अथसमुद्रान्योक्तयः नावज्ञानादवैदग्ध्यादुदधेर्महिमैव

सः यन्नीरयंकमग्नानिमहारत्नानिशेरते १ यद्यपिवद्धःशैलैर्यद्यपिगिरिमथनमुषितसर्व

स्वः तदपिविभीतभूधररक्षाविधौदीक्षितोजलधिः २ यद्यपिस्वच्छभाग्येनदर्शयत्युदधि

र्मणीन् तथापिजानुदघ्नोयमितिचेतसिमाकृथाः ३ रत्नैरापूरितस्यापिमदलेशोस्तिनांवु

धेः मुक्ताःकतिपयाःप्राप्यमातंगामदविह्वलाः ४ अधःकरोषियद्रत्नंमूर्द्धाधारयसेतृणं

दोषस्तवैवजलधेरत्नंरत्नंतृणंतृणं ५ कथामप्येतेस्वस्त्यस्तुविद्रुमचनायनमोमणिभ्यः

152

राम॰
७९

कल्याणिनी भवतु मौक्तिकशुक्तिमाला: आत्रमपासकलमेव फलंपयोधेयद्वारुणैर्जलचरैर्न विदारितोस्मि ६ इंद्रकवे: आदापवारिपरितः सरितामुखेभ्य: किंतावदर्जितमनेनदुरर्णवेन द्वारीकृतंचवडवावदनेकृतंचपातालकुक्षिविवरेषुनिवेशितंच ७ श्रीशुकस्य ग्नावारणामणयोहरिर्जलचरोलक्ष्मीः पयोमानुषीमुक्तौघा: सिकता: प्रवाललतिकाशैवालमंभ: सुधातीरेकल्पमहीरुह: किमपरंनाम्नापिरत्नाकरोदूरेकर्णरसायनंनिकटतस्तृष्णापिनो प्रशाम्यति ८ एतस्माद्दमृतंसुरै: शतमखेनोच्चै: श्रवा: सद्गुण: कृष्णेनाद्भुतविभ्रमैकवसतिर्लक्ष्मी: समासादिताद्यत्यादिप्रचुरा: पुरातनकथा: सर्वेभ्यएवश्रुता अस्माभिर्नचदृष्टमत्र जलधौमिष्टंपयोपिक्वचित् ९ संख्येयानभवंतियेयुगशतैर्गाभीर्यमुख्यागुणा: सत्यंचारिनिधेतयापितदिदं चिंतेविधत्तेव्यथं स्वच्छंदेनतिमिंगलान्निजकुलग्रासंमुहु: कुर्वतोयत्तत्तेवारयितुंनिजेपिविषयेनस्वामितावियते १० वातोल्लासितकल्लोलंधिक्तेसागरगर्जितंयस्मती

राम॰
७९

153

रेतृषाक्रांतः पांथः पृछतिकूपिकां ११ तृषंधरायाःग्रामपतयशोषायःसोंवुदोगर्ज्जतिगर्ज्जेतूद्वैः
यस्त्वेषकस्यापिनहंतितृष्णांसकिंवृथागर्ज्जतितिस्त्रयोद्धिः १२ कइन्नोल्लैःस्थगयन्मुखानि
ककुभाममभ्रंल्लिहैरंभसाद्वारेणपिदिवानिशंजलनिधेगर्ज्जन्नविश्राम्यसितोयंतेयदिघो
रनक्रनिल्लयंस्वादुव्यधास्यद्धिधिः किंकर्त्तासितदानवेद्धितरल्लैस्वैरेवदुश्चेष्टितैः १३ केषा
मप्येतेयद्वीचिभिःस्पृशासिगगनंयच्चपातालमूलंरत्नैरुद्दीपयसिपयसायत्पिधत्सेधरित्रीं धि
कसर्वंतत्तवजलनिधेयद्विमुच्यास्रधारांस्त्रीरेनीरग्नहृराणरसिकैरध्वगैरुज्झितोसि १४ गो
डाभिनंदस्य अयंवारामेकोनिल्लयइतिरत्नाकरइतिश्रितोस्माभिस्तस्मातरलितमनोभिर्ज
लनिधिःकएवंजानीतेनिजकरपुटीकोटरगतंक्षणादेनंताम्यत्तिमिरमकरंपास्यतिमुनिः
१५ मालवरुद्रस्य चपलतरतरंगैर्दूरमुत्सारितोपिप्रयतितवकीर्तिदक्षिणावर्तशंखःपरिग
णयपयोधेपद्मनाभाययोग्यस्तचनिकटनिषण्णैःसुल्लकैःश्लाघ्यताका १६ कस्यापिद्रुतःस्व

पितिकेशवःकुल्लमितस्तदीयद्विषामितश्चशरणार्थिनः शिखरिपत्रिणःशेरतेऽतोपिवडवानलः
सहसमस्तसंवर्तकैरहोविततमूर्जितंभरसहंचसिंधोर्वपुः १७ भर्तृहरेः धामारोहतिबांछति
स्यगपितुंतेजोपितेजस्विनामुच्चैर्गर्जतिपूरयन्नपिमहींभोनिधेभोधरःकांक्षिद्गुपजी
व्यतोयचुल्लकान्सिंधोभवत्सन्निधौपानीयप्रचयेषुसत्स्वपिनतेजातोविकारःक्वचित् १८ ग्रं
येवारांराशेकुलिशकरकोपप्रतिभयादयंपक्षप्रेम्णागिरिवरसुतस्त्वामुपगतः त्वदंतर्वास्त
व्योयदिपुनरयंवाडवशिखीप्रदीप्तः पक्षंगंग्लपयतिततःकोस्यशरणं १९ कपोरेतोकिं
वाच्यामहिमानवात्रजलधेयस्येंद्रवज्राहतस्त्रस्तःक्ष्माभृदमज्जदंबुनिचमेकोलीरपोताकृ
तिः मैनाकोपिगभीरनीरविलसत्पाठीनपृष्ठोल्लसत्सेवालांकुरकोटिकोठरकुडंतरेनिर्वृ
तः २० तादृक्कसस्समुद्रितमहीभूमृद्भि-- कषैः श्रोतोभिःपरिचारितादिग्धिदिग्धिद्वीपैः
समंतादियंयस्यस्फारिफणावलीमणिचयेमज्जत्कलंकाकृतःशेषःसोप्यगमद्यदंगदयदं

155

तस्मैनमःशंभवे २१ एतौवधिरकवेः इतिश्रीशार्ङ्गधरपद्धत्यांसमुद्राख्योक्तिपरिछेदः ॥ अथरत्नान्योक्तयः अनस्तमितसरस्यतेजसस्तद्विजंभितंपेनपाषाणकंकस्यमौल्यम
त्यंवसुंधरा १ यस्यवज्रमणेर्भेदेभिद्यंतेलोहसूचयः करोतितत्रकिंनामनारीनखविलेख
नं २ सोमकांतोमणिःस्वच्छःसूर्यकांतिस्तथानकिं उद्गारेतुविशेषोस्तितयोरमृतवह्निजः
३ स्फटिकस्यगुणोयोसौसएवायातिदोषतां धत्तेस्वच्छतयाछायांयतोमलवतामपि ४ सुधा
करस्पर्शाद्द्विहिद्रवतिसर्वतः चंद्रकांतमणेस्तेनमृदुत्वंलोकविश्रुतं ५ वपुःपरीणहगुणे
नतेभ्योयशस्विनः किंमणयोभवंति तथापिचूडासुमहीपतीनांतएवखेलंतिनगंडशैलाः ६
त्यजनिजगुणाभिमानंमरकतपतितोसिपामरेवणिजिकाचमणेरपिमौल्यंलभतेयतस्त
द्दीपितेश्रेयः ७ भ्रष्टंनृपतिकरीटाद्भूमौपतितंनितिरोहितंरजसा विधिविलसितेनरत्नंजनच
णविडंवनांसहते ८ आघ्रातंपरिलीढमुग्रनखरैःक्षुण्णंपुनर्लुंचितंक्षिप्तंतद्वन्नीरसमवकु

श्रा·
८१
156

पितेनेत्तिव्यपांमाकृष्याः हेमाणिक्यतवैतदेवकुशलंयद्धनेरेणाग्नहादंतः सत्वनिरूपणायस
हसाचूर्णीकृतोनाश्मना ९ उतंसेषुनर्तितःक्षितिभुजांनक्षेत्रकैर्लक्षितः साकंचंलुठितो
घनस्तनतटेलीलावतीनांक्वचित् कपृंभोश्चिरमंतवैवजलधेर्दैवाद्दृशीर्णोभवन्खेल
च्चात्तकुलांगघर्षणपरिक्षीणप्रमाणोमणिः १० केषामप्येते पौरस्त्यैर्दाक्षिणात्यैः स्फुरदु
रुमतिभिर्मित्रपाश्चात्यसंघैरौदीच्यैर्यत्परीक्ष्यक्षितिपतिमुकुटेन्यासिमाणिक्यमेकंयद्येतर्मि
न्कथंचित्कथयतिकृपणःकोपिमालिन्यमन्यप्रेक्षावंतस्तदातंनिरवधिजडतामंदिरंसंगि
रंते ११ येगृहंतिहठान्नृणांनिमणयोयेचाप्यपःखंडकंतेदृष्टाः प्रतिधामदग्धमणयोवि
छिन्नसंख्याश्चिरं नोजानेकिमभावतःकिमथवादैवाद्दहोश्रूयतेनामाप्यत्रतुनाहृष्टास्य
हिमणोरत्नानिगृह्णंतियः १२ कस्यापि केनासीनःसुखमकरुणेनाकराद्दुद्धृतस्त्वंविक्रे
तुंवासमभिलषितःकेनवास्मिन्कुलेषु यस्मिन्वित्तव्ययभरसहोग्नाहकस्तावदास्तांना

(स्म)

राम·
८१

157

स्निग्धातर्मरकतमणीत्वत्परीचाक्रमोत्र १३ शावदर्भिणः नभ्येतांशावदंधकारदलना दुद्योति
तारोदसीनाथेरावतवन्निरस्तादितिजग्रासः कृतो वासवः नोच्चिंतामणिरत्नवत्त्रिभुवने॰
च्छिन्नाविपद्गार्पिनांभूत्वात स्य हरे हरः प्रणयिनाकिं कौस्तुभेनार्जितं १४ यन्मुक्तामणयोंबु
धेरुदरतःक्षिप्तामहावीचिभिः पर्यंतेषु लुठंतिनिर्मलरुचः स्पष्टाट्टहासाइव ततस्येवपरी २४
क्षयाजलनिधे द्वीपांतरालेविनोरत्नानांतुपरिग्रहव्यसनिनः संत्येवसांयात्रिका २५ सिंधुस्त
रंगैरुपकल्प्यफेनान्वत्नानिपंकेमलिनीकरोति तथापितान्येवमहीपतीनांकिरीटकोटीषु
पदंलभंते १६ इतिश्रीदामोदरसूनुशार्ङ्गधरपद्धत्यांरत्नान्योक्तिपरिच्छेदएकषष्ठितमः ६१
अथ शंखान्योक्तयः उच्चैरुच्चरतुचिरंक्रियत्नीवर्त्मनितनुंसमारुह्यदिग्व्यापिनिशब्दं गुणेशं
ख संभावनाभूमिः १ कस्यापिकीटगृहं कुटिलोंतः कठिनःक्षारांबुसंभवः शून्यः शंखः
श्रीपतिनिकटेकेनगुणेनस्थितिंलभेः २ शार्ङ्गधरस्य अंतःकुटिलतांबिभ्रच्छंखःप्रक्ष

158

त्ति निष्ठुरः हुं करोति यदाध्मातस्तदैव वहुगर्णपते ३ तातः क्षारनिधिः स्वसा जलधिजा भ्राता सुरेशद्रुमः सौजन्यं सह कौस्तुभेन शुचिता यस्याद्विजेशादपि धिक्कर्माणि स एव कंकेवुर धुना पाखंडकांताकरे विश्रांतः प्रतिवासरं प्रतिगृहं भैक्षेण कुक्षिंभरिः ४ सर्वाशापरिपूरिहुंकृति मदो जन्मापि दुग्धोदधेर्गौर्विंदाननचुंविसुंदरतरं पूर्णेंदु विंवाद्वपुः श्रीरेषा सह जा गुणाः किमपरं भर्ण्यंत एते हि यत्कौटिल्यं हृदि पांचजन्य भवतस्तेनापि लज्जामहे ५ शंखाः संतिसहस्रशो जलनिधेर्वीचीछटावर्द्धिताः पर्यंतेषु लुठंति ये दलशतैः कल्माषितक्ष्मातलाः एकः कोपि स पांचजन्य उदभूद्राश्चर्यधामा सतां यः संवर्तभरक्षमैर्मधुरियोः श्वासानिलैः पूर्यते ६ क्वचांभोधौ जन्म क्वच षपुरिदं कुंदधवलं क्व चावासस्थानं अहह हविष्मोः करतले क्व नीचानामास्ये परिणतिरियं चुंवनविधावितीवेदं शंखः करुणकरुणं रोदति मुहुः ७ इति श्रीप्राकृधरपद्धत्यां शंखान्योक्तिपरिच्छेदः द्विषष्टीतमः ६२ अथ नघन्योक्तयः यद्यपि दिग्भित्ति

159

ष्विासरितः परितः परित्तांभसः संतितदपिपुरं दूरतरुणीसंगतिसुखदायिनीगंगा १ आजन्मस्थि
तयोमहीरुहइमेकामंसमुन्मीलिताः कल्लोलाःक्षणभंगुराःपुनरमीनीतापरांमुन्नतिं अंतग्री
हपरिग्रहावहिरपिभ्राम्यतिगंधद्विपाभ्रांतःशाणानशोणितयोनसहतेत्वत्संपदांविप्लवान् २
छायांप्रकुर्वंतिनमंतिपुष्पैःफलंनियच्छंतितटद्रुमापे उन्मूल्यतानेवनदीप्रयातितरंगिणी
कष्टतिनिपातमेकंचिरस्यापि ४ कु पन्नमस्ति ३ कतिपयदिवसस्थायीपूरोदूरोन्नतिर्भ
विताते तटिनितटद्रुमपातितनिपातमेकंचिरस्यापि ४ कुरुगंभीराशयतांकल्लोलैर्जनयलो
कविभ्रांतिंपीतपयोधरलक्ष्मीःकस्यनचरणौविलंघ्यासि ५ इतिश्रीशार्ङ्गधरपद्धत्यांनद्य
न्योक्तिपरिच्छेदस्त्रिषष्टीतमः ६३ अथतडागान्योक्तयः हंसैर्लब्धप्रशंसैस्तरलितकमलव्र
जस्तरंगैस्तरंगैर्नीरैरंतर्गभीरैश्चपल्लवककुलत्रासलीनैश्चमीनैः पातीरूढद्रुमालीतलसुख
शयितस्त्रीप्रतीतैश्चगीतैर्भातिप्रक्रीडदानुस्तवसलिलचलच्चक्रवाकस्तडागः १ क्रौंचैःक्रीड

160

शा॰
८३

तुकूर्दंतां च कुररः कंकः परित्यज्यातां मद्गुर्मा घतु सारसश्चरसतु प्रोड्डीयतां टिट्टिभः भेकाः संतु च का
वसंतु चरतु स्वच्छंदमाटिल्लटे हं हो पद्मसद्मरमातु यौड्डी कुतः कतिपये हंसैर्विना श्रीस्तव २ कयो
रेतौ स्वयमवसरसरस्तेसलिलैरूपकल्पमर्थिनामनिशं इदमतिसुलभमंभोभवतिपुराज्जलध
राभ्युदये ३ वल्लभस्य एतस्मिन्मरुमंडलेपरिचरत्कल्लोलकोलाहलक्रीडत्ककमपंकजश्रीं
कविलसलिलः शंकमत्स्यव्रजं केनेदं विकसत्कुशेशयकुटीकोणक्कणत्षट्पदं स्वैरैणश्रीणितपा
यमुज्वलजलं च क्रे विशालसरः ४ कस्यापि स्तोकांभः परिवर्ततां गशफरीगणासार्थिनः सर्वे
तोलप्यंपते वकटिट्टिभप्रभृतयस्तन्नतेषु साधुस्थिति सद्यः शोषमुपागते घ सरसि श्रीपद्मप॰
द्माकरे तस्मिंन्यं कतिनीविलासरुचयो हंसाः कृपास्यंतमी ५ इंद्रकवेः मादृग्गजदानलिप्त
करटप्रच्छादनक्षोभिता स्रोगतः सीस्तिविधेरुरग्रति हतायस्यांमयोनिर्मलाः कष्टं भाग्यविपर्यये
ण सरसः कल्पांतरस्यापि नस्तस्याप्येकबकप्रचारकलुषं कालेन जातं जलं ६ विज्जकायाः रे

शम॰
८३

161

पद्माकर यावदस्ति भवतो मध्ये पयः पूरितं तावद्धंसचकोरकंककुररश्रेणीसमुल्लासय पश्चा
त्वं समदद्विकोटचटुलत्रोटीपुटव्याहतीत्रुट्यत्ककर्कटकर्परव्यतिकरैर्निंदास्पदं यास्यसि ७६
ति श्रीशार्ङ्गधरपद्धतौ तडागान्योक्तिपरिच्छेदश्चतुःषष्टितमः ६४ अथ कमलान्योक्तयः रे पद्मि
नीदलुत वात्र मयाचरित्रं दृष्टं विचित्रमिव यद्विदितं ध्रुवं तत् यैरवञ्जुडसलिलैः परिपालितस्त्वं
तेभ्यः पृथग्भवसि पंकभवोसि यस्मात् १ शार्ङ्गधरस्य पंकजजन्मेषु वासः प्रीतिर्मधुपेषु कंटकैः
संगः पयःपितृदपितवैतद्विचित्रमित्रोदयेहर्षः २ लक्ष्मीधरस्य कुसुमेकोपागतक्वाविकसतिरात्रौ
दिवा च कूपांड्याः अलिकुलनिलयं रुचिरं किंतु यशः कुमुदकमलयोरेव ३ कस्यस्य चारम
श्रीकता लोकेनासमाने समानता इति वकुमुदोद्विदे कमलैर्मकुलापितं ४ कस्यापि नाल्प
स्य प्रसरोनडेष्वपि कृतावासः स्वकोशे रुचिरं डेकर्कशता मुरवेति मृदुता मित्रेम हान्ध्रपश्चयः आ
मूलं गुणसंग्रहव्यसनता द्वेषश्च दोषाकरे यस्यैतास्थितिरंबुजस्य वसतिर्युक्तैव तत्र श्रियः ५

प्रसारितकरे मित्रे जगदुद्योतकारिणि किंन्नकैरवलज्ञाते कुर्वीतः कोशसंहृतिं ६ लक्ष्मीसंप
र्कजातोऽयं दोषः पद्मस्यनिश्चितं यदेषगुणसंदोहधाम्नि चंद्रे पराङ्मुखः ७ रत्नाकरतनुजन्तुषि
द्विजराजे राजतिश्रियो मित्रे अमृतकरे चकलावति पद्मिनि वामा कुतो भवसि ८ एतौ धनदेवा
नां उदितवति द्विजराजे कस्य न हृदये मुदः पदं दधति संकुचसि कमल यदयं हरहर वामो विधि
र्भवतः ९ अंतःछिद्राणि भूयांसि कंटका बहवो बहिः कथं कमलनालस्य नाभूवन्भंगुरा गुणाः
१० एतेन गुणाः पंकज संतोऽपि न ते प्रकाशमायांति यल्लक्ष्मीवसते स्तव मधुपैरुपजीव्यते को
शः ११ कामं भवंतु मधुलंपटषट्पदौघसंघट्टघर्घरघनध्वनयोऽत्र वंद्याः जायन्नतिश्रुतिसु
खविधिरेव यत्र भृंगः स कोऽपि धरणीधरनाभिपद्मः १२ केनासीनः सुखमकरुणेनाकराटुद्धृ
तस्त्वं विक्रेतुं वा सममभिलसितः केन वास्मिन्कुलेषु यस्मिन्वित्तव्ययभरसहो ग्राहकास्ता वदास्तां
नास्ति भ्रातर्मरकतमणे त्वत्परीक्षाक्षमोऽत्र १३ इति श्रीशार्ङ्गधरपद्धत्यां पंकजान्योक्तिपरिच्छेदः

163

पंचषष्ठितमः ६५ अथ कूपान्योक्तयः चित्रं न तद्यदयमंबुभिरंबुदौघः सिंधुप्रवाहपरिपूरणया महीयान् त्वं त्वर्थिनामुपकरोषि यदल्पकूप निष्पङ्ककुक्षियुगलं हि महत्त्वमेतत् १ दिनमवसितं विश्रांताः स्मस्त्वया मरुकूप हे परमुपकृतं शेषं वक्तुं वपंनपुनः क्षमाः भवतु सुकृतैरध्वन्यानामशोषजलो भवानियमपि घनच्छायाभूयात वोपतटं शमी २ कर्पोरप्येतौ भौमस्थामसूत्रतनुवदनक्रूरपातात्त कुक्षिक्रोडभ्रांतोपहतविभवस्याप्यकिं ते ब्रवीमि येन त्वतः समभिलषतो वांछितः क्षुद्रकूपत्काम्यन्मूर्त्ते भवति सहसा कस्य नाधोमुखत्वं ३ यद्यपि वहुगुणगम्यं जीवनमेतस्य कूपमुखस्य जयति तत्त्थापि विवेको दानं पात्रानुमानेन ४ भोजदेवस्य सगुणैः सेवितोपांतो विनतैः प्राप्तदर्शनः नीचोपि कूपः सत्पात्रैर्जीवनार्थं समाश्रितः ५ शार्ङ्गधरस्य इति श्रीशार्ङ्गधरपद्धत्यां कूपान्योक्तिपरिच्छेदः षट्षष्ठितमः ६६ अथ मरुस्थलान्योक्तयः मरौ नास्त्येव सलिलं कृच्छ्राद्यदपि लभ्यते तत्कटु स्तोकमुष्णं च न करोति वितृष्णतां १ पापं पापं पिव पिव पयः

सिंचसिंचांगमंगं भूयोभूयः कुरुकुरुसखेमज्जनोन्मज्जनानि एवाशेषश्रमंशमयदुर्दुरविताध्व
न्यवंधुःसिंधुर्दूरीभवतुभवतोमारवः पांथपंथाः २ कयोरेतौ भोभोः किंकिमकांडएवपतितस्त्वं
पांथकान्यागतिस्तत्रं दृकेतृषितस्यतेखलमतिः सोयंजलंगतहते अस्यानोपगतामकामसुलभांत
संप्रतिकुक्ष्महे त्रैलोक्यप्रथितप्रभावमहिमामार्गोह्यसौमारवः ३ अभिनवगतमस्य सत्यादपा
न्विपुलदलवपुष्पपुंजसंपत्यरीतवपुषःफलभारनम्रात् योमार्गसिंजितशकुंतसमाश्रितोरु
शाखान्मरौमृगयतेनततोस्तिमुग्धः ४ कस्यापि लत्रपसेपुनरपिपुनःप्रेक्षा पूर्वानिकाश्चते
नक्रियाःस्वपमजलतां जानन्नपिप्रविश्यम किमसिविमनाः किंचोन्मादीत्तदपि कस्यलीं
शिशिरमधुरंवारिप्राप्नुंयदध्वगवांछसि ५ नरसिंहस्पइतिश्रीशार्ङ्गधरयद्धतयांमरुस्थलान्यो
क्तपरिच्छेदः समाप्तश्छितमः ६७ अथदावानलोक्तयः यस्यामहत्वभाजोभवंति गुणिनामिताध
नुर्दंडाः दहतस्तांवंशालींकोवनवह्नेविवेकस्ते १ हेदावानलशैलाग्रवासिनः साधुशाखि

165

नः मुग्धव्यर्थत्वं गुणाल्पयानकरणाग्नियादग्धाः प्रेरितेनप्रभंजनैः २ दुर्दैवप्रभवप्रभंजनजवादुद्भू
तभूमीरुहानेतान्सत्वगुणाल्पयानकरणाग्निर्व्यक्तिमुन्माघसि ब्रूमस्त्वांवनहव्यवाहयदमीद
ग्धाईदग्धात्रपिद्रष्टव्यास्तवतुत्तणाद्विल्पपितोनामापिनज्ञायते ३ अभ्युन्नतेपिजलदेनगदेक
सारसाधारणप्रणयहारिणिहायदेते उल्लासलास्यलतितैतरवोनयांतिहेदावपावकसतावकए व४
वदोषः ४ विध्वस्तमृगपक्षिणोविधुरतांनीतास्थलीदेवताधूमैरंतरिताःस्वभावमलिनैराशा
महीतापिता भस्मीकृतपसपुष्पपत्त्रवफलैर्निम्नान्महायादृपानुहतेनदवानलेनविपिनंवल्मी
कशेषंकृतं ५ इतिश्रीशार्ङ्गधरपद्धत्यांदावानलोत्मिनरिछेदः अष्टषितमः ६८ अथपसकोणी
न्योक्तयः विश्वाणत्वयिभस्मकंसमभवन्मंदादरष्वंदनेकःशौमंकल्पयांचकारनकृतीकृतिंव
सानेत्वयि धूतूरस्पहयात्तुजात्वयिगतेतत्याजकः केतिकौस्वातंत्र्याज्जहिहित्वमीश्वरगुणान्
त्मोकोस्तितदूहकः १ त्वंचेत्संचरसेहृषेणलघुताकानामदिग्दंतिनांव्यालैःकांचनकाचकुं

कुंडल्लानि कुरुषे हानिर्न हेमन्तः पुनः मूर्द्धा चेद्दहसे जलं शमयशः किं नाम लोकत्रयी दीपस्यांबुवां
धवस्य जगतामीशोसि किं ब्रूमहे २ छित्से ब्रह्मशिरो यदि प्रपयसि त्रेते षुसख्य यदिक्षीवः क्री
डसि मातृभिर्यदि रतिं धत्से श्मशाने यदि सृष्टूं संहरसि प्रजां यदि तथाप्याधाय भक्तो मनः कं से
वे करवाणि किं त्रिजगती शून्यात्वमेवेश्वरः ३ थोड्कवैः दामोदरमुदराहितभुवनं योवहति
लीलया गरुडः कस्य तरोरुपरि ष्टात्खिन्नो सौ खेदमपनयतु ४ अहिरहितिति संभ्रमपदमित
रो जनः किमपि कातरो भवतु विहगपते गवि हारे सुतु सरलमणालविशदत्वरुचिरः ५ गु
रोसि भुवनभारे मावक्रांवितनुकं धरांशेष ज्वय्येकस्मिन्दुःखिव निसुखितानि भवंति भुवनानि
६ केषामेतेवः पीयूषसहोदरैः लपयसि ज्योत्स्नाजलैः सर्वतो यश्चत्वामधिकाधिकत्वल्लपति
प्रोद्दामातापैः करैः भ्रातर्व्योमतयोरपि स्थितेमिह व्यातन्वतो विक्रिया निर्मुक्तस्य महत्वमेतदस
मंदूरे विरूढंतव ७ भोजस्य शैत्यं नाम गुणस्तवैवतदनुस्वाभाविकी स्वच्छता किं ब्रूमः शुचितां

भवंतिप्रचुचयः स्पर्द्धीनयस्यापरेकिं चातःपरमुच्यतेस्तुतिपदंपञ्जीवनंदेहिनांत्वंवेत्सीचपथेनग-
च्छसियथःकस्त्वांनिरोद्धुंक्षमः ८ जलभ्रमोत्पत्तिकृतोगुणौघान्प्रकाशयंत्यांमृगतृष्णिकायांज
लापायभ्रांतिरभून्ममैषाप्रभूतसंतापकरीपिपासा ९ अज्ञत्वजन्मप्रथात्मभूमतइदंब्रह्मांडमंडा
त्पुनर्विश्वं स्थावरजंगमंतदितरंतत्तन्मूलमित्यंपयःधिक्त्वांचोरइवप्रयासिनिभृतंनिर्गत्यजा-
लांतरैर्वध्वंतेविवशास्त्वदेकशरणास्त्वामाश्रिताजंतवः १० समुद्रस्यापत्यंप्रथितमहिमामुद्रितभु
वःस्वसाप्रालेयांशोस्त्रिनयनशिरोधामवसतेः मरारातेर्यापित्सरसिहृहृकिंजल्कनिलया तथापि
श्रीःस्त्रीत्वात्प्रकृतिचपलालिंगतिखलान् ११ तापापहेसुहृदयेरुचिरेप्रबुद्धेमित्रानुरागनिरते
धृतसद्गुणौघे स्वांगप्रदानपरिपूरितषट्पदौघेयुक्तंतवेहकमलेकमलेस्थितिर्यत् १२ जंभा
रिरेवजानातिरंभासंभोगविभ्रमं घटचेटीविटःकिंस्विज्जानात्यमरकामिनी १३ यदेतत्कामि
न्याःसुरतविरतौपक्ष्मवरुचाकरेणानीतःसन्च ससिसहहारेणगुणिनामुद्धकुर्वन्गीतंकुचकल

शां·
८७
168

पीठोपरिलुठन्नयेवीरणदण्डचक्रकठयफलंकस्यतपसः १४ यद्देतन्नेत्रांभस्तदपिवसमासाद्यतरुणी
कयोल्लेख्यासक्तंकुचकलशमस्याः कलयति ततः श्रोणीबिंबंव्यवसितविलासंतदुचितंस्वभावस्व
छानांयतनमपिभाग्यंवितरति १५ यत्पूर्वैयवनाग्निशस्त्रसलिलैश्चीर्णंतपोदुष्करं तस्यैतत्फलमी
दृशंपरिणतंयज्जातरूपंवपुः मुग्धायांगकपोलचुंबनसुखंसंगश्चरत्नोत्तमैः प्राप्तुंकुंडलवांछसे
किमपरंयन्मूढदोयसे १६ सद्भूतसद्गुणविचित्रमहार्हकांतकांताघनस्तनतटांचितचारुमूर्ते
श्चाः पामरीकठिनकंटविलग्नभग्नहाहारहारितमहोभवितागुणित्वं १७ मौलौसन्मणयोगृ
हंगिरिगुहात्यागः किलात्मत्वचोनिर्यत्नोत्पन्नतैश्चवृत्तिरनिलैरेकैवचर्येदृशी अन्यत्रान्नजुव
र्त्मवागद्विरसनाचक्रोविषंवीक्षणंसर्वोमंगलसूचकंकपयभोभोगिन्सखेकिंत्विदं १८ दुष्ट
रितैरेवनिजैर्भवतिदुरात्माविशंकितोनित्यंदर्शनपथमापन्नंपन्नगकुलमाकुलीभवति १९ य
स्मैददातिविवरंभूमिः फूत्कारमात्रभीतेवचाशीविषः सदैवाघः करंडकस्थितिंसहते २० भे

शामः
८७

169

केनक्षणतासरोषपरुषंयत्क्रूरमस्मन्मुखेनानेदातुंकर्णचपेटमुत्क्षिप्तंभियाहस्तः समुल्लासितः
यच्छ्राधोमुखमक्षणीविदधतानागेनतूष्णींस्थितंतत्सर्वंविषमेक्षिणोभगवतः कस्यापिलीलाला
यितं २१ कृत्वाकुंभसमुद्भवेनमुनिनाकिंचिन्महत्साहितं सिंधावंधुकुटुंबदर्दुरकुलंहर्षादि
दं ध्यायति गांभीर्यायदितेनविध्यातिनवात्रस्पृतिभेकीशिशोरत्रागत्यमुखंचसंतुतिमयोजातानुकं
पावयं २२ आपूर्येतपुनःस्फुरच्छफरिकासारोर्मिभिर्वारिभिर्भूयोपिप्रविजृंभमाणनलिनंपश्या
मितोयाशयं इत्याशाशततंतुबद्धहृदयोनक्तंदिनेदीनधीः शुष्यत्यातपशोषितस्यसरसस्तीरेज
रत्सारसः २३ अस्तंगतोयमरविंदवनैकबंधुर्भास्वान्नलंघयतिकोपिविधिप्रणीतं हेचक्रधैर्य
मवलंब्यविमुंचशोकंधीरास्तरंतिविपदंनतुदीनचित्ताः २४ रात्रिर्गमिष्यतिभविष्यतिसुप्रभा
तंभास्वानुदेष्यतिहसिष्यतिपंकजश्रीः इत्थंविचिंतयतिकोशगतेद्विरेफेहाहंतहंतनलिनींगज
उज्जहार २५ हंसःप्रयातिशनकैर्यदिजातुतस्यनैसर्गिकीगतिरियंहिनतत्रचित्रंगत्यातयाजिग

मिषुर्वकएवमूढश्चेतोदुनोतिसकलस्यजनस्यनूनं २६ कल्याणंनःकिमधिःकमितोजीवनार्थयत
स्त्वंछित्वावृक्षान्नूहहहदहसिभ्रातरंगारकारनन्वेतस्मिन्नशानिपिशुनैरातपैराकुलानामध्वन्याना
मशरणमरूत्प्रांतरेकोभ्युपायः २७ भ्रातर्ग्राम्यकुविंदकंदलतयावस्त्राण्यमूनित्वयागोणीविभ्रम
भाजनानिसुबहून्यात्माकिमायास्यतेकिंत्वेकंरुचिरंचिरादभिनवंवासस्तदासूत्र्यतां यन्नोज्झं
तिकुचस्थलात्क्षणमपिप्रोणीभुजांवल्लभाः २८ केयामतेहे लांगलिकनिषधाक्रोडे लोहंपु
रायदग्धाक्षीः स्पर्शस्पर्शविशेषातदातिलमजनिष्टहेमनृपयोग्यं २९ अच्युतस्य दुर्गीनदीशिपि
लबंधविलंबिनीनोरभ्युन्नताजलमुचोविषमःसमीरःआरूढवान्निजकुटुंबयुतोध्वनीनस्तत्क
णीधारकुरुयत्सदृशंकुलस्य ३० वंशःप्रांशुरसौघुणव्रणमयोजीर्णावरत्राद्रुमाःकीलाःकुंठत
याविंशतिनमहीस्याहन्यमानाअपि आरोहव्यवसायसाहसमिदंशैलूषसंत्यज्यतांद्वरेश्रीर्निकटे
कृतांतमहिषग्रैवेयघंटारवः ३१ मौलिःस्वर्णकिरीटकांतिरुचिरःकेयूरभव्यौभुजौत्वद्भृत्याःकि

ल्नः कंचुकिप्रभृतयो देवेतिविज्ञाप्यसे इत्थंकल्पनयाकुशीलवनृपाहंकारदार्घ्यदृप्यान्नृत्यांतेभव
तोभविष्यतिमर्षीमात्राचशेषंवपुः ३२ अमीतितल्पास्तैल्पिकनूनमेषांस्नेहाद्दवस्याभवतोपनीता
द्वेषोभविष्यद्घदमोसुनूनंतदानजानेकिमिवाकरिष्यः ३३ किंव्यक्तीकुरुषेसरोजमुकुलाका
रामुरोजश्रियंलीनेनाधरपल्लवेकुसुमतांकिंचास्मितेनामुना आकूतामृतशीतलाः श्रमयसेकिं
वागिरोनागरिमुग्धेकामिनिकिंमुधाघटयसिक्लीवेकटाक्षछटान् ३४ चक्रांनैषतरूविचर्तन
गतिंगृह्णातिसापिस्मितंस्मेरैरिंगवलनैरमुष्यतमनाक् चेतःपरावर्तते हस्तेत्वंमुनिदारकस्यप-
तिताकल्याणितन्नीयतां वेदीमार्जनबर्हिरर्पणवषट्कृतव्यपाकेवयः ३५ स्रग्दाममूर्द्धनिवि
धेहिगवेधुकानांगुंजामयींशिरसिधारयहारयष्टिंवाल्केकलादतिचिरंपतितासिग्रामेतद्व्रोहम
न्यदपिभूषणसेषणीयं ३६ केषामयंपते भ्रातःकांचनलेपगोपितपहिस्तान्ताकृतेसर्वतोमा
मैषीःकलशास्थिरोभवचिरंदेवालयस्योपरि ताम्रत्वंगतमेवकांचनमयीकीर्तिः स्थिरातेधुना

नोतस्तत्वविचारणाप्रणयिनोलोकाबहिर्हृदयः ३७ नयत्रगुणवत्पात्रमेकमप्यस्तिसन्निधौकस्तत्र
भवतः पांचेच्छुपांजग्रहणाग्रहः ३८ रत्नपात्रगतंस्नेहं प्रदीपश्रीविवर्द्धनं प्रयास्यंतिविनातेनभ
स्मत्वंयेभवद्गुणाः ३९ एतौराजपितामहमहादेवस्य कोहितुलामधिरोहतिशुचिनादुग्धेनसहजन्म
धुरेण नन्नंविकृतंमथितंकेवलमुद्गिरतियस्नेहं ४० दृढतरगलविनिबंधः कूपनिपातेपितेकल
शधन्यः यज्जीवनदानैस्त्वंसततंयांव्याधिनंगांहंसि ४१ पत्सद्गुणोपिसरलोपितटस्थितोपिवंशोद्भ
वोपिविदधासिनशंसकर्मवक्रात्मनोचडिशादंडतदेतदस्यज्ञानामिसंगतिफलंतववंटकस्य ४२
द्वात्रिंशद्दशनद्वेषिंत्वविभ्रंषप्राणीतित्वत्प्रयुक्तंसपदिचविनिमीलत्याकुलंत्वद्वियोगात् वपुरपिपर
मीशस्याश्रितंनोचितंते सुरभिमसुरभिंवायत्समंस्वीकरोषि ४४ अपित्यक्तासिकस्तूरिपामरैः पंक
शंकया अलंखेदेनभूपालाः किंनसंतिमहीतले ४५ केषामप्येतेजन्मस्थानंनावलुविमलंवर्ण
नीयोनवर्णोदूरात्पुंसांवपुषिरचनापंकशंकांकरोषि यद्वाप्येवंसकलसुरभिद्रव्यगर्वापहारीको

मध्येममतिनिवणाः न उरःशिनिताकेनाजि के संवार कोरातं ४२ ध्याति निरिषिकौ ४

173

ज्ञानीतेपरिमलगुणः कोपि कस्तूरिकायाः ४६ विद्यापतेः कौस्तुभमुरसिमुरारेः सिरसिशशीघो-
तनेपुरोजपिनः जलजन्मानोजलधेर्जग्मतुरियतींगतिंपश्य ४७ तुल्यंभूभृतिजन्मतुल्यमुभयोर्मू
ल्यंचतुल्यंवपुस्तयोस्तुल्यंदीर्घमुदग्रटंकदलनंतुल्यं पाषाणयोः एकस्याखिलवंदनायविधिना
देवत्वमारोपिततद्वारेविहितापरस्यपदाघातास्पदंदेहली ४८ तृषार्तैःसारंगैःप्रतिजलधरंभूरि
विरुतंघनैर्मुक्ताधाराःसपदिपयसस्तान्प्रतिमुहुः खगानांकिमेघाःकइहविहगाचाजलमुचाम
याच्चोनार्तानामनुपकरणीयोनमहतां ४९ भ्रातःपंजरलावकमाकुरुसंतोषमन्यनिधनेनभ्रात
स्तवैवधातुःस्वामित्वंकिंनजानासि ५० मल्लोत्सर्गगजेंद्रस्यमूर्द्धिकाकःकरोतिपत कुलानुरूपं
तत्स्ययोगजोगजएवसः ५१ श्वासाङ्कुलितसिवयस्यकिंगतकरिणाभवेत् पिपीलिकस्तृतेनैवसकु
टंवापिजीवति ५२ बंधनस्थोहिमातंगःसहस्तभरणक्षमः अपिस्वछंदचारीश्वास्वोदरपूरणक्ष
मः ५३ ऊर्णनेवदधातिनैवविषयोदोहस्यवाहस्यवातृप्तिर्नास्यमहोदरस्यवद्रुभिर्घासैःपलाले

रपिहाकंठंकपमस्यपृष्ठशिखरेगोरीसमारोप्यतेकोगः हातिकपर्दिकैरलमितिग्राम्येगजोहास्यते ५४
केषामप्येते पिवयय: प्रसरन्तितिपांतिकं कलय कांचनकांचनप्रखलो इदमवघतमंहियदीह
सेभयशरणं प्रतिकेसरिणस्त्वलो ५५ भीमसैंहस्य उदस्योच्चैःपुच्छंशिरसिनिहितंजीर्णजटिलंयद्
कम्व्यापन्नद्विपपिशितलेशाः कवलितागुहागर्तेशून्येसुचिरमुषितंजंबुकसखेकिमेतस्मिन्कुर्मोयद्
स्मिनगतःसिंहसमतां ५६ भद्रेंदुराजस्य यस्यांसकेसरियुवापदमावबंधगंधद्विपेंद्ररुधिरारुणि
तांगणण्यां तामघपर्वतनदीधुतधूम्रलोमागोमायुरेषवपुषामलिनीकरोति ५७ निःकंदाम्रविं
दिनीस्यपुटितोद्देशंककशेरस्थलीजंबालाविलमंबुकर्तुमितरास्तेवराहीसुतान् दंष्ट्रायांचतुरर्णु
वोर्मिपटलैराज्ञाविताया भियंयस्याएच शिशोःस्थिताव सुमतीसापोत्रिणीपुत्रिणी ५८ कपोरप्यतो
शतपदीशतपादशतेहारण्यदिनगोष्ठं द मप्यतिवर्तितुं किंभियताद्विपदस्यहनूमतोजलनिधेःक्र
मणविवदामहे ५९ भल्लाटस्य उत्तांदोलनमघतेऽनुगतंयमर्मस्पृष्पस्यवाहुकानेकशरोषसो

175

स्य वहुत्वाच्छ्रेष्ठामुखोत्थाः कृताः कारण्यफलपूर्णगुल्मकुहरस्थानेषु ताभीषिकाभीतः संप्रति कौ
शिकाद्गलचलत्तत्वात्वात्कपेनत्यासि ६० दामोदरदेवानां आकर्ण्य गर्जितरवं घनगर्जतुल्यं
सिंहस्य याति वनमन्यदिभा भयार्त्ताः तत्रैव पौरुषनिधिः स्वकुलेन सार्द्धं दर्पोद्धुरोच सतिवीतभयो
वराहः ६१ भो नीरविंदुक सरोजदलाश्रयेण मुक्ताफलेकिमितिमत्सरमातनोषि पाणौनिगृह्य सम
चेद्दितुमहसमस्त्वं मूढान्विमोहयविंडवित्तमौक्तिकश्रीः ६२ इति श्रीशार्ङ्गधरयद्धत्यामिश्रान्योक्ति
परिच्छेदः एकानसप्ततितमः अथ सामान्यराजप्रशंसा सरस्वती स्थिता वक्त्रे लक्ष्मीः करसरोरुहे किं
कीर्तिः कोपिता राजन्येन देशांतरं गता १ सरस्वतीकुटुंबस्य तुलामारुह्य रविणा हृष्टिके निहितं प
दं भवता शिरसि न्यस्तमयत्नेनैव भोगिनां २ किं कृतेन न यत्र त्वं किमसौ कलिः कलौ चेद्भवतो ज   यत्र त्वं ३
न्म कलिरस्तु कृतेन किं ३ सर्वदा सर्वदोसीति मिथ्या संस्तूयसे जनैः नारयो लेभिरे पृष्ठं न वक्षः प
रयोषितः ४ असिधारापथेनाथ शत्रुशोणितपिच्छले कथं लक्ष्मीः समायाता निर्जगाम कथं पशाः

176

श्रा.
८१

५ कोप्यन्यः कल्पवृक्षोपंचकास्तिक्षितिमंडले यत्पाणिपल्लवोप्यकः कुरुतेधःसुरद्रुमं ६ अपूर्वेयंध
नुर्विद्याभवताशिक्षिताकुतः मार्गणौघःसमायातिगुणोयातिदिगंतरं ७ देवत्वंजययस्यराजतिमहा
राष्ट्रीकुचोद्धःकुलंलाटीवाग्रदुनर्मचेदियनिता नामीगभीरंमनः आभीरीकटिविस्तृजामतिरसि
गौडीकचचपामलः कर्णाटीरतिपुष्करेणसरसः कीरीमुखोन्त्ययशाः ८ तेकौपीनधनास्तएववहि
परंधात्रीफलंभुंजतेतेषांद्वारिनदंतिवाजिनिवहास्तैरेवलब्धाक्षितिः तैरेतत्समलंकृतंनिजकु
लंकिंवावहुब्रूमहेयेदृष्टापरमेश्वरेणभवतारुष्टेनतुष्टेनवा ९ संग्रामांगणमागतेनभवताचा
पेसमारोपितेदेवाकर्णययेनसहसायद्यत्समासादितं कोदंडेनशराःशरैररिशिरस्तेनापिभूमं
डलंतेनत्वंभवताचकीर्तिरतुलाकीर्त्याचलोकत्रयं १० देवत्वद्यशसिप्रसर्पतिजगत्स्त्रीसु
धोद्धेश्रवश्चंद्रैरावतकौस्तुभाः स्थितिमिवामन्यंतदुग्धांवुधौकिंत्वेकःपुनरस्तिदूषणकणोयया
तिभ्रमात्कुसंश्रीः शितिकंठमहितनयानीलांचरंरोहिणी ११ क्षीरोदीयंतिसघःकुलजलधयो

राम:
८१

॥॥

177

वासुकीयंतिनागाः कैसीयंतिशैलादि विचदिविषदः शंकरीयंति सर्वे पौष्पा कीर्णा समंतान्प्रचलति धवलेचारुकीर्तिप्रतानेमघोषाकाचभूषाकिमितिनसहसामौक्तियंति देव १२ किंतृत्तांतैः परगृह गतैः किंतुनाहंसमर्थस्तूष्णींस्थातुंप्रकृतिमुखरोदाक्षिणात्यास्वभावः गेहेगेहेविपणिषुतथाचत्वरे पानगोष्ठ्यामुन्मत्तेवभ्रमतिभवतोवल्लभादेवकीर्तिः १३ मातंगदिवाकरस्यायं युधिष्ठिरोसिभीमोसि चरितैरर्जुनोभवान् प्रज्ञयासहदेवोसिवाच्यतानकुलस्यते १४ बलिकर्णदधीच्याद्यापुरापंचत्वमागताः पंचत्वंनागताश्चित्रंत्वयिजीवतिपंचमे १५ सद्गुणग्रथितःशुद्धैरमितैर्ब्रह्मगोलकः विधत्तेकीर्तिकन्याः क्रीडाकंदुककौतुकं १६ यशोदयामंडितकांतदेहोकल्येपिगोपिगोपालजनस्यनेता गोमंडलेपासिवलेनयुक्तःकथंनराजन्पुरुषोत्तमोसि १७ साशंकस्यसमकुलाकृतकृतेरत्यंतनिस्तेजसश्छिन्नांगस्यचिकंपमानहृदयस्याहृतमन्योर्भृशं लज्जांसंत्यजतः क्रमंविमृशतोविद्यात्वकृत्यश्यपतः ल्केशोयोर्थिजनस्यवत्तुमनसोमाभूत्सतेविद्विषां १८ नोकामःप्रतिहन्यतेप्रणयिषुत्त्वन्नेपिनाय

त्वया नैवाधः कुरुषे दृषद्भिरसनव्यालानतेवल्लभाः नोवज्रास्तवमूर्तयोनचतनूनित्यंजडानुग्रहव्य
ग्रानोविषमाचदृक्कमथचखातःक्षितावीश्वराः १९ सिक्तायांवीरकंटस्यलवहुलगलद्रक्त धारां
तुवर्षैर्मीघत्मातंगकुंभोद्दलनविलुलितै मौक्तिकैः पुष्पितायांसंग्रामोद्यानभूमौतुरगमुखोत्खात
रूढस्यलायांजातंत्वत्नवदूवल्याः फलमतुलरसास्वादहृद्यंजयश्री २० उद्यद्वालांकुरश्रीर्दिग्दि
ग्दि दशनैरेभिराशागजानांरोहन्मूलासगौरैरुरगपतिफणैरत्रपातालकुंडौ अस्मिन्नाकाशदे
शेविकसितकुसुमाराशिभिस्तारकाणांनाथत्वत्कीर्त्तिवल्लीफलतिफलमिदंदिविमिदोः सुधांशुः
२१ हारानाहरदेवचंद्रधवलान्नोचेत्ययोधेस्तटींसंप्राप्तेत्वपि सैन्यवारणगणैर्मज्जद्भिराक्षोभि
तं सिंदूरारुणमंबुमेघपटलीपीतोक्षितंशुक्तिषुस्वल्पैरेवदिनैः करिष्यतिमहीमातान्मुक्ताफ-
लं २२ दर्प्पांधरांधगजकुंभकपाटकूटसंक्रांतनिघ्नघनशोणितशोणरोचिः वीरैर्व्यलोकियुधि
कोपकषायकांतिः कालीकटाक्षद्रवमस्यकरेकृपाणः २३ द्दृष्टुं चंदनंनसहतेमल्लीस्रजंनेक्षतेहा

खुर३

179

रं द्वेष्टि सिताभ्रमुक्तिविशत्तामं विगृह्णाति च श्रीभूपालमहीधरेषु विपिनेष्वंभोधितीरेषु च त्वत्

कीर्तिस्त्वदरिस्त्रिया च विलसत्युच्चैः स्फुरत्यांडिमा २४ कुत्सन्त्वं घनमंडलस्य गलितं लग्नमुरवेवि

द्विषां विधुदामजगाम तावक मसिं गर्ज्जेद्भवदुंदुभिः दृष्टिस्त्वत्परिपंथि पार्थिववधूनेत्रेषु वक्रैः स्थि

तिं चापं ते वसुधाधिनाथ वलभित्कोदंडकांतिः स्थिताः २५ कस्यापि सिंदरं सीमंतात् स्मितं मुखाद्वै

रिराजवनितानां यस्य प्रतापयशसी हरतः स्मसदृग्गुणासहने २६ धनदे वानां अभिमतफलदाना

त्वं च कल्पद्रुमश्च प्रकटमिह विशेषं कं च नोदाहरामः कथमिव मधुरोक्तिप्रेमसंमानमिश्रं तुल्

यतु सुरशाखवादे वदानं त्वदायं २७ कल्पद्रुमो न जानाति न ददाति बृहस्पतिः अयं हि जगती जानि

र्जानाति च ददाति च २८ नालिंगति कुचद्वयं भवदिभप्रोत्तुंगकुंभद्वयं त्रासाद्वेणिलतासु नैव दध

ति प्रीतिं तवासिभ्रमात् भ्रूभंगान्भवदीयदुर्द्धरधनुर्भीत्या भजं ते न नते वैरिक्षोणिभुजो निजां वुजदृ

र्णांभूमंडलाखंडल २९ भग्नासुरिपुसेनासु नरेंद्र त्वं महाम हाखड्गांतर्द्विजनेवैकमद्राक्षीः संमुखं मुखं ३० देनत्वद्दिजयप्रयाणविलत्सद्वाजिराजिव्रजक्षुण्णक्ष्मातललीनपांशुपटलप्राप्तानिमेषक्षणः सुत्रामावहुमन्यतेफणपतिं पातालमूलस्थितिं सोप्युद्दामकरींद्रदुर्द्धरभराक्रांतः सहस्रेक्षणं ३१ नभिन्नाद्भिर्भिन्नामिलतिदुःखःस्याः कथ ----- तेकमणाद्द्विजपरिद्दठारयतुवा अद त्वैवग्रासंगृहपतिरसावस्तसमयेक्रयामः किंकुर्मोगृहण ---- वनविधिः ३२ अत्युक्तो यद्दिनप्रकुप्यसिमृषावादं नचेन्मन्यसेतद्भूमोद्भुतकीर्तिना परसनाकेषांनकं दूयते देवत्वत्त रणिप्रतापदहनज्वालावलीशोषिताः सर्वैवारिधयस्तवाहितवधूनेत्रांवुभिःपूरिताः ३३ -- यामाकविज्ञान्यपिचटकवधूं चंचुकोटिचूतानिप्रोड्डीयंतेस्ववेश्मन्यशनविरहितेविवर्द्ध नश्रोत्रियेण ---- नय्यकस्माद्भ्रदुलशिशुकराकृष्टहारावलीतोभ्रष्टास्तत्रैवहृष्टासुवत्ति

181

रत्नसंपूरणीमौक्तिकौघाः ३४ इतिश्रीशार्ङ्गधरपद्धत्यांसामान्यराजप्रशंसापरिच्छेदः सप्ततितमः
७० अथविशिष्टराजप्रशंसा गायतिकिन्नरगणाः सहकिन्नरीभिः श्रीराम चंद्रशिखरेषुहिमाचल
स्यशंखेंदुकुंददलवालमृणालनालनीहारहार हरहासस्सितंयशस्ते १ वाल्मीकिकवेः कूर्मःपा
दोत्रपष्टिर्भुजगपतिरसौभाजनंभूतधात्रीतैलापूर्णाः समुद्राः कनकगिरिरयंवृत्तिवर्तिप्ररोहेज्यो
तिश्चंडांशुरोचिर्गगनमलिनमाकज्जलंदह्यमानाशत्रुश्रेणीपतंगाज्वलतिरघुपतेस्त्वत्प्रतापप्रदी
पः २ हनूमतः तत्कृतंयन्नकेनापितद्दत्तंयन्नकेनचित् तत्साधितमसाध्यंयद्विक्रमार्केण
भूभुजा ३ हस्तीवन्यःस्फुटिकघटितेभित्तिभागेस्वबिंबंदृष्ट्वादृष्ट्वाप्रतिगजइतित्वद्विषांमंदिरेषुदं
ताघातादृत्लितदशनस्तंपुनर्वीक्ष्यसद्योमंदंमंदंस्पृशतिकरिणीशंकयाविक्रमार्क ४ कपोरप्येत
कृष्यत्कृष्यासिविक्षोत्कटकरटिघटाकुंभकूटावटांतनिष्ठूतासृक्तटिन्यास्तटनिकटरटत्कोणपा
ट्टहासः श्रीभोजत्वद्रणस्ताद्ग्रतभटविकटोरःस्थलःजोदिकुप्यद्भ्रौघत्रोटकोटीप्रकटचटच्च

182

दाशाह्वरौद्रोभवद्वा क्‌ ५ भोभोश्रीभोजदेवं श्रयत विनयतः शात्रवः क्षत्रिवर्गाः प्राणत्राणायनोवानभ
वति भवतां छायया रण्येशरण्यंमत्वामातंगकुंभद्वितयमितिपुराक्रूरदृष्टेतिर्भिनति क्रुद्धः शुद्धांतकांता
कुचकलशयुगं रंहसासिंहशावः ६ श्रीभोजशाम्यंतवकल्पवृक्षः सदांवदान्योपिकथंप्रयातु यतोभ
वद्दानसुपुष्टविग्रहव्येनकुक्षिंभरिरस्यभर्ता ७ एतेदेवेश्वरस्यमंदश्चंद्रकिरीटपूजनरसे तृष्मान
क्रुस्वार्चनेस्तंभः शंभुनितंविनीप्रणतिषुव्यग्रोनधातुर्गृहे अस्माकंपरमई नोस्ति वद्दनेन्यस्तेनसंर
क्षितः एष्वीराजनरेश्वरादितिनृणंतन्यजनेएज्यसे ८ विनायकपंडितस्य आविंध्यादाहिमाद्रे
र्विरचितविजयस्तीर्थयात्राप्रसंगाद्‌ उद्ग्रीवेषु प्रहर्षान्नृपतिषु विनमत्कंधरेषुप्रसन्नः आर्यावर्तंयथार्थं
पुनरपिकृतवान्म्लेच्छविच्छेदनाभिर्देवः शाकंभरीन्द्रो जगति विजयते वीसलक्षोणीपालः ९ ब्रूते सं
प्रति वाहुवाणतिलकः शाकंभरीभूपतिः श्रीमद्विग्रहराजएव विजयी संतानजानात्मजः अस्माभिः
करदंव्यधायि हिमवद्विंध्यांतरालंभुवः शेषः स्वीकरणायमास्तुभवतामुद्योगशून्यंमनः १० एतौय

न्नपूयप्रशस्तेः नाचक्रचक्रिविरहज्वरकातरोभूः संकोचमंवुजनयाह्निनयामिनीयं हम्मीरभू-
यहयपादविदीर्णभूमिरेणूत्करैरयमकारि दिवांधकारः ११ कस्यापि राजनृराजमृगांकशंकरक-
वेःकिंपत्रिकायामिदंश्लोकः कस्यतवैवदेवशृणुमः संपद्यतांपठ्यते एतासामरविंदसुंदरदृशांद्रा-
क्कामरांदोलनोद्दूहेलद्भुजवल्लिकंकणझणत्कारः क्षणंवार्यतां १२ अर्द्धंदानववैरिणागि-
रिजयाप्यर्द्धंहरस्याहृतं देवेत्थंभुवनत्रयेस्मरहराभावेसमुन्मीलति गंगासागरमंवरंशशिक-
लाशेषश्चपृथ्वीतलं सर्वज्ञत्वमपीश्वरत्वमगमत्वांमांचभिक्षाटनं १३ एतौशंकरकवेः पृथ्वी-
श्रीमदनंगभीममहतीतद्देष्टनंवारिधिः पीतोसौकलशोद्भवेनमुनिनासव्योम्निखद्योतवत् तद्दि-
ग्भोदेनुजाधिनाथजयिनः पूर्णपदंनाभवद्देवश्चेतसिवर्ततेतवसदात्वन्नोमहान्नापरः १४
सार्वभौमस्य: चक्रः पप्रच्छयांधंकपयममसखेनास्तिसक्कापिदेशोवस्तेनोयत्ररात्रिर्भवतिभु-
विरवगायेतिसप्रत्युवाचनीतेमेरौसमाप्तिंकनकवितरणैः श्रीजगद्देवनाम्नासूर्येनंतर्हितेस्मि-

184

रा
६५

न्कनियययदिवसैर्वासरा द्वैततद्विसृष्टिः १५ मुखेहारावल्लिर्नयनयुगलेकंकणभरोनितंबेपत्रालीस
तिलकमभूत्पाणियुगले अरण्येश्रीकर्णत्वदरियुवतीनांविधिवशादपूर्वोयंभूषाविधिरहहजातः
किमधना १६ कीर्तिःकातववीररुद्रभवतः स्ववाहिनीगाहिनीदिक्पालानरविलात्परीत्यदध
तीपाण्योःप्रतापनलंसप्तांभोनिधिमंडलान्यधिगतात्वय्येकपत्नीव्रतख्यातैविष्णुपदंस्पृशत्यमुदि
नंशेषस्यशीर्षाण्यपि १७ कयोरप्येतौविंध्याद्रिःकरसाधनेनिरुपमोरत्नाकरःकोशभृत्सोगं
धीमल्लयाचलःपरिचराः सर्वेपिविद्याधराःविश्वासप्रतिसरणंवितरणंदेशोप्यहोदक्षिणःपां
ड्याखंडलवीरपांड्यभवतःकिंकिंनलोकोत्तरं १८ सुदर्शनकवेः तवांगणेसुंदरपांड्यदेवमत्त
गजाःशृंखलिनोविभांति आवासदानादरिभूपतीनामाशांतशैलादिवसापराधाः १९ मुंचतिमुंच
तिकोशंत्यजतित्यजतिक्षमामाशुअर्जुनदेवकृपाणेभजतिचभजतिप्रकंपमरिवर्गः २० इति
श्रीशार्ङ्गधरपद्धतौविशिष्टराजवर्णनपरिच्छेदएकसप्ततितमः अथारिपलायनं अधाक्षीन्नोल्ल

राम:
६५

185

कामपमपमुदन्वंतमतरद्विशल्यसौमित्रेरयमुपनिनायौषधिवनं इतिस्मारंस्मारंत्वदरिनगरीभित्तलि
खितं हनूमंतंदंतैर्दशतिकुपितोराक्षसगणः १ राजन्राजसुतानपाठयतिमांदेव्योपितूष्णीस्थिताःकु
ब्जेभोजयमांकुमारसचिवैर्नाद्यापिकिंभुज्यते इत्थंराजशुकस्तवारिभुवनमुक्तोध्वगैःपंजराच्चित्र
स्थानवलोक्यशून्यवलभावेकैकमाभाषते २ कयोद्गच्छेतो कु
रुवककराघातक्रीडासुखेनविपुज्यसेवकुलविटपिनस्मर्तव्यंतेमुखवासवसेचनं चरणघनावं
धोपास्यस्यशोकसशोकतामितिनिजपुरत्यागेयस्यद्विषांगजदुःखिय ३ रत्नाकरस्य क्रामंत्यः
क्षतकोमलांगुलिगलद्रक्तैःसदर्भास्थलीःपादैर्यांतितपावकैरिवगलद्वाष्पांबुधौताननाभीता
भर्तृकरावलंवितकरास्त्वच्छत्रुनार्योधुनादावाग्निंपरितोभ्रमंतिपुनरप्युद्यद्विवाहाइव ४ क्षणं
कांतारागप्रसरविलसन्मानसरतिः क्षणंशालोत्संगेद्विजकुलरवाकृष्टहृदयः क्षणोपत्रध्वा
नंश्रुतिपुलकितोयद्भयभरादसंप्राप्तोरण्येरिपुरवनिपालस्थितिमिव ५ येघभानुपंडितस्य तन्वी

मुक्तिभूषणांककलगिरंगेमोद्गवंविभ्रतीवेयतीब्रणितापरांविवनांसीत्कारमातन्वती दोर्भ्यांचंडतुषा
रपातसभयामालिंग्यकंठेमृशंस्वांमूर्तिंदयितामिवातिरसिकात्वद्विद्विषः शेरते ६ योतीतःपांथपं
थाव्रजतिननुकथंस्यावरंवर्त्ममुग्धेमार्गेएकामिएकःस्थितमिदमिहतेविस्मितंवीक्ष्यनेत्रे अध्वा
नंब्रूह्यपेतध्वनिभवतिवचश्छिन्नमुद्वाष्पनेत्राःदृश्यंतेदावमूढाःपथिपथिकविदैस्त्वद्द्विषांनायना
र्यः ७ भूसंपर्करजोनिपातमलिनाःस्वस्माद्गृहात्प्रच्युताः समान्यैरपिजंतुभिःकरतलैर्जीर्णेःशेष
मालिंगिताःसंलग्नाःक्वचिदेकतामुपगताःक्वापिप्रवृद्धाःक्वचिन्मुक्ताःक्वापिचसारिवत्प्रतिगृ
हंभ्रांतास्तवारिस्त्रियः ८ सालकाननयुक्तापिसालकाननवर्जिता हारावरुद्धकंठापिविहारा
रिवधूस्तव ९ श्रोतेसीमंतरत्नेमरकतिनिहतेहेमतांटकपत्रेलुप्तायांमेखलायांकनकमणि
तुलाकोटियुग्मेगृहीते शोणंबिंबोष्ठकांत्यात्वदरिमृगदृशामित्वरीणामरण्येराजन्गुंजाफलानांस्र
जइतिशबरानैवहारंहरंति १० केशानामप्येतेकर्षंद्भिःसिचयांचलान्यतिरसात्कुर्वद्भिर्मपॉरै

187

लिंगनंगृह्णानैः कचमालिखद्भिरधरं विभ्रामयद्भिः करौ प्रत्यद्गेपि भवद्द्विरोधिनृपतेरंतः पुराणां महो धिक्कृष्टविटपैर्दिटैरिव वने किंनाम नो चेष्टितं ११ धनदेवानां त्वद्वैरिणो वीर पलायितस्य प्रकाशयन्तः मरणमार्गान् कृशानुरासीदभिनंदनीयस्तं गेषु लग्नो निजमंदिरेषु १२ राजन्द्विषस्ते भयविद्रुतस्य भालस्थलं कंटकिनो वनांताः अद्यापि किं वानुभविष्यतीति व्यपाटयन्द्रुमिवाक्षराणि १३ स्नाताः प्राहषिवारिवाहपटलैः प्रोद्भूतदूर्वांकुरव्याजेनातकुशाः प्रणाल सलिलैर्दत्वा तिरापांजलीन् प्राक्रियां १४ इति श्रीशार्ङ्गधरपद्धत्यां अरिपलायनपरिच्छेदो द्विसप्ततमः ७२ अथ राजनीतिः राजास्य जगतो हेतुर्वृद्धेर्वृद्धाभिसंमतः नयनानंदजनकः शशांक इव चारिधेः १ धार्मिकं पालनपरं सम्यक्परपुरंजयं राजानमभिमन्यंते प्रजापतिमिव प्रजाः २ पर्जन्य इव भूतानामाधारः पृथिवीपतिः विकलेपि हि यज्जीव्यते जीवति न तु भूपतौ ३ प्रजां संरक्षति नृपः सा वर्द्धयति पार्थिवं वर्द्धनाद्रक्षणं श्रेयस्तन्नाशेन्यत्सदप्यसत् ४ आत्मानं प्रथमं रा

जाविनयेनोपपादयेत् ततोमात्यांस्ततः पुत्रांस्ततोभृत्यांस्ततः प्रजाः ५ राज्ञिधर्म्मिणिधर्म्मिष्ठाः पापेपापः
समेसमाः लोकास्तदनुवर्त्ततेयथाराजातथाप्रजाः ६ नृपाणांचनराणांचकेवलंतुल्यमूर्त्तिता
आधिक्यंतुक्षमाधैर्यमाज्ञादानंपराक्रमः ७ सदानुरक्तप्रकृतिः प्रजापालनतत्परः विनीतात्मा
हिनृपतिर्भूयसींश्रियमश्नुते ८ प्रजानरंजयेद्यस्तुराजारक्षादिभिर्गुणैः अजागलस्तनस्येवत
स्यजन्मनिरर्थकं ९ अजामिवप्रजांहन्याद्योमोहात्पृथिवीपतिः तस्यैवजायतेतृप्तिर्द्वितीयानक
र्यचन १० प्रजापीडनसंतापात्समुद्भूतोहुताशनः राज्ञः कुलंश्रियंसंतिप्राणान्नादग्ध्वाविनि
वर्तते ११ यथावीजांकुरः सूक्ष्मः प्रयत्नेनाभिवर्द्धितः फलप्रदोभवेत्कालेतद्वल्लोकः सुरक्षि
तः हिरण्यधान्यरत्नानिस्त्रियश्चगजवाजिनः तथान्यदपियत्किंचित्प्रजाभ्यः स्यान्महीपतेः १३
उत्खातान्प्रतिरोपयन्कुसुमितांश्चिन्वल्लघून्वर्द्धयन्नत्युच्चान्नमयन्ममं पृथूश्चलघुयन्विश्लेषयन्
संहतान् क्षुद्रान्कंटकिनोवहिर्न्नियमयन्म्लानरोपितान्यालयन्मालाकारइवप्रयोगनिपु

ण्गेराजाचिरंनंदति १४ अकृत्वानिजदेशस्यरक्षांयोविजगीषते सनृपःपरिधानेनहृतमौलिः
पुमानिव १५ विजिगीषुररिर्मित्रंपार्ष्णिग्राहोथमध्यमः उदासीनोंतरातर्द्धिरित्येषानृपतेः॥
स्थितिः १६ निर्विषोपियथासर्पःफणाटोपोभयंकरः तथाडंवरवान्राजानपरेरभिभूयते
१७ पुष्पैरपिनयोद्धव्यंकिंपुननिशितैः शरैः जयेभवतिसंदेहः प्रधानपुरुषक्षयः १८ भूमि
र्मित्रंहिरण्यंवाविग्रहस्यत्रयंफलं नास्त्येकमपियद्येषांनतत्कुर्यात्कथंचन १९ सामैवहिप्र
योक्तव्यमादौकार्यंविजानता साम्नसिद्धानिकार्याणिविक्रियांयांतिनक्वचित् २० नविश्वसेद्
मित्रस्यमित्रस्यापिनविश्वसेत् विश्वासाद्भयमुत्पन्नंमूलान्यपिनिकृंतति २१ शपथैःसंधितस्या
पिनविश्वासंव्रजेद्रिपोः राज्यलोभाद्यतोवृत्रः शक्रेणशपथैर्हतः २२ उपकारगृहीतेनशत्रुणा
शत्रुमुद्धरेत् पादलग्नंकरस्थेनकंटकेनेवकंटकं २३ नोपेक्षितव्योविद्वद्भिःशत्रुरल्पोप्यव
ज्ञया वह्निरल्पोपिसंवृद्धः कुरुतेभस्मसाद्वनं २४ कौर्मसंकोचमास्थायप्रहारानप्यमर्षयेत्

कालेकालेचप्रतिमानुतिष्ठेत्क्रमसर्यवत् २५ तावद्भयाद्धिभेतव्यंयावद्भयमनागतं आगतंतुभयंद
ष्ट्वाप्रहर्तव्यमभीतवत् २६ परोपिहितवान्बंधुर्बंधुरप्यहितःपरः अहितोदेहजोव्याधिर्हितमारण्य
मौषधं २७ यच्छक्यंग्रसितुंग्रासंग्रस्तंपरिणमेच्चयत् हितंचपरिणामेस्यात्तदद्यंभूतिमिच्छता
२८ मातातसाहसंकार्षीर्विभवैर्गर्वमागमः स्वगात्राण्यपिभारायभवंतिविपर्यये २९ मात्वंतात
बलेस्थित्वाबाधिष्ठादुर्बलंजनं नहिदुर्बलदग्धानांकुलेकिंचित्प्ररोहति ३० यानिमिथ्याभि-
भूतानांपतंत्यश्रूणिरोदतांतान्संतापकान्विद्धिसपुत्रपशुबांधवान् ३१ ब्राह्मणेषुचयेशूराः
स्त्रीषुज्ञातिषुगोषुच वृंतादिवफलंपक्वंधृतराष्ट्रपतंतिते ३२ देवब्रह्मस्वपुष्टानिसैन्यानि
पृथिवीपतेः भद्रकालेविशीर्यंतेसैकताःसेतवोयथा ३३ प्रणीतश्चाप्रणीतश्चयथाग्निर्दैवतं
महत् एवंविद्वानविद्वांश्चब्राह्मणोदैवतंपरं ३४ अदैवंदैवतंकुर्युर्दैवतंचाप्यदैवतं ब्राह्म
णालोकपालांश्चसृजेयुश्चातिकोपिताः ३५ युगेयुगेषुयेधर्मास्तेषुधर्मेषुयेद्विजाः तेषांनिंदान

कर्त्तव्यायुगरूपाहिब्राह्मणाः ३६ आक्रम्यब्राह्मणोभुंक्तेपरिक्षीणोश्चबांधवैः गोभिश्चनरशार्दूल
राजसूयाद्विशिष्यते ३७ गतश्रीगैणकान्द्वेष्टिगतायुश्चचिकित्सिकान् गतश्रीश्चगतायुश्चब्राह्म
णान्द्वेष्टिभारत ३८ बुद्धौकलुषभूतायांविकारेप्रत्युपस्थिते अनयोनयसंकाशोहृदयान्नापसर्प्प
ति ३९ नकालःखड्गमुद्यम्यशिरःकृंततिकस्यचित् कालस्यबलमेतावद्विपरीतार्थदर्शनं ४०
ज्ञानन्नपिनरोदैवात्प्रकरोतिविगर्हितं नकर्मकस्यचिल्लोकेगर्हितंरोचतेकृतं ४१ मातानसंपदा
मत्तमारूढोस्मीतिविश्वसीः दूरारूढपरिभ्रंशविनिपातोतिदारुणः ४२ कितवायंप्रशंसंतियंप्र
शंसंतिचारणाः यंप्रशंसंतिबंधकाः सपार्थपुरुषाधमः ४३ राज्ञोनोयंप्रशंसंतियंप्रशंसंतिवैद्वि
जाः साधवोयंप्रशंसंतिसपार्थपुरुषोत्तमः ४४ प्रज्ञागुप्तशरीरस्यकिंकरिष्यंतिसंहताः गृहीतह
स्तछत्रस्यवारिधाइवारयः ४५ बहूनामर्थसाराणांसमुदायोहिदारुणः तृणैर्विधीयतेरज्जुर्बध्य
तेदंतिनस्ततैः राज्ञाभृत्याःप्रकर्त्तव्यास्तेहिसर्वक्रियाक्षमाः ४६ कुलीनाःशौर्य्यपन्नाभक्ताःशास्त्र

समाहताः महावृष्टिं समुदितास्तृणराशिर्व्यपोहति ४७ ताडितोपि दुरुक्तोपि दंडितोपि महीभुजा न चिंत
यति पः पापं स भृत्यो र्हो महीभुजां ४८ योनाहूतः समभ्येति द्वारे तिष्ठति सर्वदा पृष्टः सत्यं मितं ब्रूते स भृ
त्योर्हो महीभुजां ४९ सालसं मुखरं क्रूरं व्यग्रं व्यसनिनं शठं असंतुष्टमभक्तं च त्यजेद्भृत्यं नराधिपः ५०
रिक्ताः कर्मणि पटवस्तृष्णास्वल्पसा भवंति ये भृत्याः तेषां जलौकसामिव पूर्णानां रिक्तता कार्या ५१
शूरं व्यसनिनं लुब्धमप्रगल्भमथाकुलं मूर्खमन्यायकर्तारं नाधिपत्ये नियोजयेत् ५२ नियोगिर्वि
ना राज्यं नास्ति भूपे हि केवले तस्मादमी विधातव्या रक्षितव्याः प्रयत्नतः ५३ वेदवेदांगतत्वज्ञो जप
होमपरायणः आशीर्वादपरो नित्यमेष राज्ञः पुरोहितः ५४ क्रमागतो हितमतिः सर्वभावपरीक्ष
कः धीरो यथोक्तवादी च एष दूतो विधीयते ५५ प्रवीणो वाक्पटुर्धीमान्स्वामिभक्तश्च नित्यशः अ
लुब्धः सत्यवादी च भांडागारिक इष्यते ५६ इंगिताकारतत्वज्ञो बलवान्प्रियदर्शनः समयज्ञः
स्वामिभक्तः प्रतीहारः स उच्यते ५७ शूरोर्थशास्त्रनिपुणः कृतशास्त्रकर्मा संग्रामकेलिचतुर

193

श्चतुरंगयुक्तः भर्तुर्निदेशावशगोभिमंतः स्वतश्चेत्सेनापतिर्नरपतेर्विजयागमाय ५८ कालेनःकुब्जा
श्चषंडाश्चतथावृद्धाश्चपंगवः एतेस्वातःपुरेनियोक्तव्याःसमाभृता ५९ सिद्धान्तमिवराजेंद्रसर्वसा
धारणा स्त्रियः परोक्षेचसमक्षेचरचितव्याःप्रयत्नतः ६० सूक्ष्मेभ्योपिप्रसंगेभ्यःस्त्रियोरक्ष्याहिस
र्वदा द्वयोर्हिकुलयोःशोकमावहेपुररक्षिताः ६१ महिष्याहृष्टयाभाव्यंगृहकार्येषुदक्षयासुसंस्कृ
तोपस्कुरयाव्ययेचामुक्तहृष्टया ६२ धर्मशास्त्रार्थकुशलाःकुलीनाःसत्यवादिनः समाःशत्रौचमि
त्रेचनृपतेःस्युःसभासदः ६३ नसासभायत्रनसंतिवृद्धाःवृद्धानतेयेनवदंतिधर्मं नासौधर्मोयत्र
नैवास्तिसत्यंनतत्सत्यंयच्छलेनानुविद्धं ६४ सभावानप्रवेष्टव्यावक्तव्यंवासमंजसं अब्रुवन्वि
ब्रुवन्वापिनरःकिल्विषमश्नुते ६५ तस्मात्सभ्यःसभांगत्वारागद्वेषविवर्जितं वचस्तथाविधंब्रु
यायथाननरकंव्रजेत् ६६ पितामातागुरुर्भ्राताभार्यापुत्रःपुरोहितः नादंड्योनामराज्ञोस्तिस्वधर्मे
योनतिष्ठति ६७ अवध्याब्राह्मणाबालाःस्त्रीतपस्वीचरोगवान् क्रियंतेव्यंगिताह्येतेततोदोषेनेलि

ष्यते ६८ नतुहन्यान्महीपालोहृतंकस्यचिद्दायदि दूतहंतातुनरकमाविशेत्सचिवैः सह ६९ विशोध
येन्महीपालोमंत्रिशल्यामशेषतः अयुक्तोनार्हतिस्यातुमस्यांमंत्ररहस्यवित् ७० मंत्रतंत्रार्पितश्रीति
र्देशकालोचितस्थितिः यश्चराद्दिक्षवेदक्तः सोमात्यः पृथिवीपतेः ७१ अतः सारैरकुटिलैः सुस्निग्धैः
सुपरीक्षितैः मंत्रिभिर्ध्रियतेराज्यंसुस्तंभैरिवमंदिरं ७२ नरपतिहितकर्ताद्वेष्यतांयातिलोकेजनप
दहितकर्तामुच्यते पार्थिवेंद्रैः इतिमहतिविवादेवर्तमानेसमानेनृपतिजनपदानांदुर्लभः कार्यकर्ता
७३ बहुकर्णोभिद्यतेमंत्रश्चतुष्कर्णः स्थिरोभवेत् द्विकर्णस्यतुमंत्रस्यब्रह्माप्यंतंनगच्छति ७४ एकं
हन्यान्नवाहन्यादिषुर्मुक्तोधनुष्मता बुद्धिर्बुद्धिमतात्क्षिप्ताहंतिराज्यंसराष्ट्रकं ७५ ततद्वयेनेनागे
द्रैर्नलैहयैर्नलैचपतिभिः कार्यसंसिद्धिमभ्येतियथाबुद्ध्याप्रसाधितं ७६ दुर्योधनः समर्थोपिदुर्मंत्रींप्र
लयंगतः राज्यमेकश्चकारोच्चैः सुमंत्रीचंद्रगुप्तकः ७७ अप्यत्रवन्नपिवोधव्योमंत्रिभिः पृथिवीपतिः
यथास्वदोषनाशायविदुरेणांविकासुतः ७८ पृष्टाब्रूतेमितंब्रूतेपरिणामसुखावहं मंत्रीचेत्त्रिप

195

वक्तास्यात्केवलंसरिपुःस्मृतः ७९ सुलभाःपुरुषाराजन्सततंप्रियवादिनः अप्रियस्यचपथ्यस्य
स्यवक्ताश्रोताचदुर्लभः ८० दुर्गाणि ~~जन्सततंप्रियवादिनः अप्रियस्यच~~ राज्ञाकार्याणिस
जलानिदृढानिच द्रव्यमन्नंचतेष्वेवस्थापनीयंप्रयत्नतः ८१ दुर्गंबहुविधंज्ञेयंपर्वतस्यजल
स्यच प्राकारस्यचनसापिभूमेरपिभवेत्क्वचित् ८२ नगजानांसहस्रेणनलक्षेणैववाजिनां
तथासिद्ध्यंतिकार्याणियथादुर्गप्रभावतः ८३ विषहीनोहियथानागोमदहीनोयथागजः सर्वे
षांवश्यतांयातिदुर्गहीनस्तथानृपः ८४ शतमेकोहिसंधत्तेदुर्गस्थोहिधनुर्द्धरः शतंसहस्राणित
या ५ थासहस्रंलक्षमेवच ८६ त्रिविधाःपुरुषाराजन्नुत्तमाधममध्यमाः नियोजयेत्तथैवैतांस्त्रि
विधेष्वपिकर्मसु ८७ तुल्यार्थंतुल्यसामर्थ्यंमर्मज्ञंव्यवसायिनं अर्द्धराज्यहरंभृत्यंयोनहन्या
त्सहन्यते ८८ निर्विशेषंयदाराजासमंभृत्येषुतिष्ठति तत्रोद्यमसमर्थानामुत्साहःपरिहीय
ते ८९ प्रसादोनिष्फलोयस्ययस्यक्रोधोनिरर्थकः नतंभर्तारमिच्छंतिपतिं षंढमिवांगना ९०

त्यजेत्स्वामिनमत्युग्रमत्युग्रात्कृपणंत्यजेत् कृपणाद्‌विशेषज्ञंतस्माद्बहुकृतनाशकं ९१ अ
विवेकिनिभूपालेनश्यंतिगुणिनोगुणाः प्रवासरसिकेकांतेयथासाध्व्याःस्तनोन्नतिः ९२ किं
शुकेकिंशुकः कुर्यात्फलितेपिबुभुक्षितः अदातरिसमृद्धेपिकिंकुर्युरुपजीविनः ९३ सेव
याधनमिच्छद्भिः सेवकैःपश्ययत्कृतं स्वातंत्र्यंयच्छरीरस्यमूढैस्तदपिहारितं ९४ वरंवनफलै
र्भैक्ष्यंवरंभारोपजीवनं पुंसांविवेकहीनानांसेवयानधनार्जनं ९५ जीवंतोपिमृताःपंचव्या॰
सेनपरिकीर्तिताः दरिद्रोव्याधितोमूर्खः प्रवासीनित्यसेवकः ९६ नकश्चिच्चंडकोपानामा॰
त्मीयोनामभूभुजां होतारमपिजुह्वंतंदहत्येवहुताशनः ९७ गृध्राकारोपिसेव्यःस्याद्धंसाका
रैःसभासदैः हंसाकारोपिसंत्याज्योगृध्राकारैःसभासदैः ९८ चक्रंसेव्यंनृपःसेव्योनसेव्यःके
वलोनृपः पश्यचक्रस्यमाहात्म्यंमृत्पिंडःपात्रतांगतः ९९ गंतव्याराजसभाद्रष्टव्याराजपूजि
तालोकाः यद्यपिनभवंत्यर्थास्तथाप्यनर्थाविनश्यंति १०० अत्यासन्नाविनाशायदूरतश्चा

197

फलप्रदाः मध्यभावेनसेव्यंतेराज्ञावह्निर्गुरुस्त्रियः १०१ आसन्नमेवनृपतिर्भजतेमनुष्यंविद्याविहीनमकुलीनमसंगतंवा प्रायेणभूमिपतयःप्रमदालताश्चयःपार्श्वतोभवतितंपरिवेष्टयंति १०२ यस्मिन्नेवाधिकंचक्षुरारोपयतिपार्थिवः कुलीनोवाकुलीनोवासश्रियोभाजनंभवेत् १०३ धवलान्यातपत्राणिवाजिनश्चमनोरमाः सदामत्ताश्चमातंगाःप्रसन्नेसतिभूपतौ १०४ राजमातरिदेव्यांचकुमारेमुख्यमंत्रिणि पुरोहितेप्रतीहारेवर्तितव्यंनृपेयथा १०५ यत्राहवेषुवध्यंतेस्वाम्यर्थमपराङ्मुखाः विकटैरायुधैर्यांतितेस्वर्गयोगिनोयथाः १०६ पदानिक्रतुतुल्यानिआहवेष्वनुवर्तिनां राज्ञासुकृतमादत्तेहतानांविपलायिनां १०७ तवाहंवादिनंक्लीवंनिर्हेतिंपरसंगतं नहन्याद्विनिहतंचयुद्धप्रेक्षीणमागतं १०८ द्विजाअपिनगच्छंतियांगतिंनैवयोगिनः स्वाम्यर्थेसंत्यजन्प्राणान्तांगतियांतिसेवकाः १०९ राजातुष्टोहिभृत्यानांमानमात्रंप्रयच्छति तेपिसन्मानमात्रेणप्राणैःप्रत्युपकुर्वते ११० सारासारपरिच्छेत्तास्वामीभृत्यस्यदुर्लभः अनुकूलःशुचिर्द

नः प्रभोर्भृत्योतिदुर्लभः १११ अतितेजस्यपिराजापानासक्तोनसाधयत्यर्थान् तृणामपिदग्धुंश
क्तोनवडवाग्निरिवबन्नाब्धिं ११२ पानमक्षास्तथानार्य्योमृगयागीतवादिते एतानियुक्त्यासेवेतप्र
संगोह्यत्रदोषवान् ११३ नृपः पानासक्तोनगणयतिकार्यंनचहितं यथेष्टंस्वच्छंदश्चरतिकिल
मत्तोगजइव ततोमानध्मातः पततितुयदाशोकगहनेतदा मात्येदोषान्क्षिपतिननिजंवेत्त्यविन
यं ११४ गुणवद्गुणवद्वाकुर्वताकार्यजातंपरिणतिरवधार्य्यायन्नतः पंडितेन अतिरभसकृ
तानांकर्मणामाविपत्तेर्भवतिहृदयदाहीशल्यतुल्योविपाकः ११५ अपाच्चतुर्थभागेनव्ययक
र्मप्रवर्तयेत् प्रभूततैलदीपोहिचिरंभद्राणिपश्यति ११६ अर्थानामर्ज्जनंकार्यंचर्द्धनंरक्ष
णंतथा भक्ष्यमाणोनिरादायैः सुमेरुःक्षीयतेपिहि ११७ कर्मणामनसावाचाचक्षुषाचचतुर्विधं
प्रसादयतिलोकंयस्तंलोकोनुप्रसीदति ११८ संभोजनंसंकथनंसंप्रश्नोथसमागमः ज्ञाति
भिःसहकार्याणिनविरोधः कदाचन ११९ संहतिःश्रेयसीराजन्विगुणेष्वपिबंधुषु तुषैरपि

199

परिभ्रष्टानष्टरोहंतितेदुल्ला: १२० मदो: परिभवोनित्यंवैरंतीव्राणस्यनित्यश: उत्सृज्यैतद्द्वयंतस्मा-
न्मध्यांवृत्तिंसमाश्रयेत् १२१ अबुद्धिमाश्रितानांचक्षंतव्यमपराधिनां नहिसर्वत्रपांडित्यंसुल
भंपुरुषै: क्वचित् १२२ तेजस्विनिक्षमोपेतेनातिकर्कशमाचरेत् अतिनिर्मथनाद्वह्नि: चंद
नादपिजायते १२३ किमप्यसाध्यंमहतांसिद्धिमेतिलघीयसां प्रदीपोभूमिगेहांतर्ध्वांतंहंतिन
भानुमान् १२४ अरावप्युचितंकार्यमातिथ्यंगृहमागते छेत्तुमप्यागतेछायांनोपसंहरतिद्रुम:
१२५ हंतुमेषोपसरतिमृगेंद्र: संकुचत्यपि बुद्धिमंत: सहंतेचनिधायहृदिकिंचन १२६ व्रजंति
तेमूढधिय: पराभवंभवंतिमायाविषुयेनमायिन: प्रविश्यहिघ्नंतिशठास्तथाविधानसंवृतांगा-
न्निशिताइवेषव: १२७ कोहंकोदेशकालौसमविषमगुणा: केरय: केसहाया: काशक्ति: कोभ्यु
पाय: फलमिहचकियत्कीदृशीदैवसंपत् संपत्तौकोनिबंध: प्रविदितवचनस्योत्तरंकिंनुमेस्या
दित्येवंकार्यसिद्धाववहितमनसंपदोहस्तसंस्था: १२८ धर्म: प्रागेवचिंत्य: सचिवगतिमतीस

र्वदा लोकनीयेप्रच्छाद्यौराग हेवौमृदुकठिनरसौयोजनीं चकाले त्रेयं लोकानुवृतंपरचरनयनैर्म
डलेवीक्षणीयमात्मा यत्नेनरक्ष्यो रणशिरसिपुनः सोपिनत्रेक्षणीयः १२९ कृतौविवाहेव्यसनेरिपु
क्षयेयशस्करेकर्मणिमित्रसंग्रहेप्रियासुनारीष्व धनेषुवंधुषुधनव्ययस्त्वेषुनगण्यतेवुधैः १३०
स्वाम्यमात्यश्चराज्यंचकोशंदुर्गवलंसुहृत् एतावदुच्यतेराज्यंसत्ववुद्धिव्यपाश्रयं १३१ संधिविग्र
हयानानिसंस्थितिसंश्रयस्तथा द्वैधीभावश्चभूपानांषड्गुणाः परिकीर्तिताः १३२ उत्साहस्यप्रभो
र्मैत्रस्यैवंशक्तित्रयंजगुः आत्मनः सुहृदश्चैवतस्मित्रस्योदयास्त्रयः १३३ सामदानेभेददंडाविि
त्युपायचतुष्टयं हस्त्यश्वरथपादांताः सेनांगस्याश्चतुष्टयं १३४ दुष्टाविनीतशत्रूणांभयहृद्वंधु
सन्निभं शस्त्रधारणमोजस्यंरक्षोविघुकृहायहं १३५ वर्षानिलरजोघर्महिमादीनांनिवारणं रा
ज्यलक्ष्मीगृहंवर्ण्यंचक्षुष्यंछत्रधारणं १३६ चामरंश्रीकरंदिव्यंराज्यशोभाकरंपरं सैहासनंसु
रैश्वर्य्यकरंलोकानुरंजनं १३७ सुमनोवररत्नानांधारणंदिव्यरूपकृत् पापालक्ष्मीप्रशमनंच

दनाद्यनुलेपनं १३७ स्नानेनाममनः प्रसादजननंदुःस्वप्नविध्वंसनं शौचस्यायतनंमलापक
र्षणंसंवर्द्धनंतेजसांरूपोद्योतकरंमदप्रशमंकामस्यचायायतनं नारीणांचमनोहरंश्रमहरंस्नाने
दशैतेगुणाः १३९ तांबूलंमुखरोगनाशनिपुणंसंवर्द्धनंतेजसोनित्यंजाठरवह्निवृद्धिजननंदु
र्गंधदोषापहं वक्त्रालंकरणंप्रहर्षजननंविद्वन्नृपाग्रेरणेकामस्यायतनं दुर्गंधदोषापहं वक्त्रा
लंकरणंप्रहर्षजननंविद्वन्नृपाग्रेरणेकामस्यायतनं समुद्भवकरेलक्ष्म्यासुखस्यास्पदं १४० देव
तातिथिविप्राणां पूजनंपापनाशनं लोकद्वयेपिशुभकृद्दानंधर्मयशस्करं १४१ सुतभृत्यसुहृ
द्वैरिस्वामिसद्गुरुदैवतं एकैकोत्तरतोवृद्ध्या श्रीकाराःपत्रमूर्द्धनि १४२ मध्येभानोःसुमाणिक्यं
पूर्वेवज्रंतुभार्गवे चंद्रस्यमुक्ताआग्नेय्यांयाम्यांविद्रुमभूमिजे नैरृत्यांराहुगोमेदं याम्येमंदनी
लकं वायव्येकेतुवैडूर्यंपुष्परागंगुरूत्तरे १४४ मारकरंबुधेशानेस्थापनीयंविचक्षणैः एत
न्नवरत्नसंयुक्तामुद्रादारिद्र्यनाशिनी १४५ एतेनानागंतयातराजभीतिभ्यः स्मृतिभ्योभारताद्भामा

यणाञ्च इतिश्रीशार्ङ्गधरपद्धत्यांराजनीतिपरिछेदस्त्रिसप्ततितमः ७३ अथनीतिः अनुगंतुं
सतांवर्त्मकृत्स्नंयदिनशक्यतेस्वल्पमप्यनुगंतव्यंमार्गस्थोनावसीदति १ प्रत्यहंप्रत्यवेक्षेतन
रश्चरितमात्मनः किंनुमेपशुभिस्तुल्यंकिंनुमेपुरुषैरपि २ सद्भिरेवसहासीतसद्भिःकुर्वीतसं
गतिं सद्भिर्विवादंमैत्रींचनासद्भिःकिंचिदाचरेत् ३ नहिंसंतिनमावंतेपरनिंदांनकुर्वते अना
हूतानचायांतितेनाप्नुमानोपिदेवताः ४ पठतोनास्तिमूर्खत्वंजपतोनास्तिपातकं मौनिनःक
लहोनास्तिनभयंचास्तिजाग्रतः ५ गतेपिवयसिग्राह्याविद्यासर्वात्मनाबुधैः यद्यपिस्यान्नफल
दासुलभासान्यजन्मनि ६ यदीछसिवशीकर्तुंजगदेकेनकर्मणा परापवादसस्येभ्योगांचरं
तींनिवारय ७ वाग्माधुर्यात्राातिलोकेप्रियत्वंवाक्पारुष्याज्ञोपकारोपिनष्टः किंतद्द्रव्यंकोकिले
नोपनीतंकोवालोकेगर्दभस्यापराधः ८ यस्यचाप्रियमन्विछेत्तस्यकुर्यात्सदाप्रियं व्याधामृगव
धंकर्तुंगीतंगायंतिसुस्वरं ९ प्रहरिष्यन्प्रियंब्रूयात्प्रहृत्यापिप्रियोत्तरं अपिचास्यशिरश्छित्वारु

203

घाच्छेच्चेत्तथापि च १० अनागतविधातारमप्रतीकारकोपनं स्थिरारंभमदीनं च नरं श्रीरूपतिष्ठते ११ सुमंत्रिते सुविक्रांते सुकृते सुविचारिते प्रारंभे कृतबुद्धीनां सिद्धिरव्यभिचारिणी १२ नालसाः प्राप्नुवंत्यर्थान्न शठा न च मायिनः न च लोकरवाद्भीता न च शश्वत्प्रतीक्षिणः १३ नोदन्वाद र्थितामेति न चांभोभिः प्रपूर्यते आत्मा तु पात्रतां नेयः पात्रमायांति संपदः १४ सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः विद्यते न हि सुकश्चिदुपायः सर्वलोकपरितोषकरो यः १५ काकतालीययोगेन यदि नात्मवति क्षणं करोति प्रणयं लक्ष्मीस्तदस्यास्त्रीत्वचापलं १६ यो यमर्थं प्रार्थयते तदर्थं घटते च यः अवश्यं तदवाप्नोति न चेच्छ्रांतो निवर्त्तते १७ केचिदज्ञानतो नष्टाः केचिन्नष्टः प्रमादतः केचिज्ज्ञानावलेपेन केचिन्नष्टास्तु नास्तिकाः १८ मित्रस्वजनबंधूनां बुद्धेर्धैर्यस्य चात्मनः आपन्निकषपाषाणे नरो जानाति सारतां १९ दुःस्थैरपि निजैरेव प्राहृतं सर्वमुत्तमं हतं त्रीणि वैरेणापि हरेकर्पटमर्थयेति २० चिंतनीया हि पदामादावेव प्रतिक्रिया न कूपखननं युक्तं प्र

शा॰ 204
२०५

दीप्तेवद्भिनागृहे २१ वरंहारिप्रमन्यायप्रभवाद्धिभवादिह कृशताभिमतादेहेपानतानतुशोफतः
२२ अपरीक्ष्यनकर्तव्यंकर्तव्यंसुपरीक्षितं पश्चाद्भवतिसंतापोब्राह्मणीनकुलेयथा २३ दिवानिरी
क्ष्यवक्तव्यंरात्रौनैवचनैवचसंचरंतिमहाधूर्त्तावटेवररुचिर्यथा २४ गावादूरप्रचारेणहिरण्यंलोभ
लिप्सयास्त्रीविनश्यतिरूपेणब्राह्मणोराजसेवया २५ अतिदानाद्बलिर्बद्धोनष्टोमानात्सुयोधन वि
नष्टोरावणोलौल्यादतिसर्वत्रवर्जयेत् २६ धनमस्तीहवाणिज्येकिंचिदस्तीहकर्षणे सेवयाकिं
चिदस्तीहभिक्षयानैवनैवच २७ स्पृशन्नपिगजोहंतिजिघ्रन्नपिभुजंगमः हसन्नपिनृपोहंति
मानयन्नपिदुर्जनः २८ जानंतिपशवोगंधाद्वेदाज्ज्ञानंतिवाडवाः चाराज्जानंतिराजानश्चक्षुर्भ्यामि
तरेजनाः २९ सपक्षोलभतेकाकोहस्तस्यविविधंफलंपक्षहीनोमृगेंद्रोपिभूमिस्थोहिनिरीक्षते
३० सपक्षोलभतेलक्षंगुणयुक्तोपिमार्गणः नलक्ष्यस्योविपक्षः स्याद्गुणैराप्यतेयदि ३१ अलब्धा
पिफलंराज्ञः संश्रितायांतिसंपदः महाहृदसमीपस्थंपश्यनीलंवनस्पतिं ३२ सर्वेसहायेच्छजवःपृ

राम॰
२०५

205

तिज्ञाताश्चपालकाः परोपकारिणः सेव्यानिर्द्धनाअपि वैनराः ३३ युक्तियुक्तंप्रगृह्णीयाद्बालादपिविच

क्षणः रवेरविषयेवस्तु किंनदीपःप्रकाशयेत् ३४ कठिनेचामधुरंवाप्रस्तुतवचनंमनोहारि वा

मोगर्द्दभरावश्रुतप्रीत्यैप्रयाणेषु ३५ यथावृष्टिःसमुद्रेषुयथातृप्तस्यभोजनं वृथादानंसमर्थस्य

वृथाखंडविभूषणं ३६ अजायुद्धमृषिश्राद्धंप्रत्यूषेमेघडंबरः दंपत्योःकलहश्चैवपरिणामेनकिं

चन ३७ सम्रेनाग्निनिमग्ध्यंतेएयमाणान्यपिक्वचित् ब्राह्मणोग्निर्यमोराजायोधिरुद्दंगृहं ३८

वस्त्रंगांचवहुक्षीरांजलपात्रमुपानहौ औषधंवीजमाहारंसंक्रीणीतयथाप्नुयात् ३९ अर्थनाशंम

नस्तापंगृहेदुश्चरितानिच वंचनंचापमानंचमतिमान्नप्रकाशयेत् ४० अहृतिकंत्यजेद्देशंहृतिसो

पद्रवांत्यजेत् त्यजेन्मायाविनंमित्रंधनंप्राणहरंत्यजेत् ४१ सोहृदेनपरित्यक्तंनिःस्नेहंखलवत

जेत् सोदरंभ्रातरमपिकिमुतान्यंएयग्जनं ४२ यन्निमित्तंभवेच्छोकस्त्रासोर्वदुःखमेववा आपा

सोवायत्तोमूलस्तदेकांगमपित्यजेत् ४३ चलत्येकेनपादेन तिष्ठतेकेनपंडितः नासमीक्ष्यापरं

स्थानंसर्वमापतनंत्यजेत् ४४ नगणस्याग्रतोगच्छेत्सिद्धेकार्येसमंफलं यदिकार्येविपत्तिःस्यान्मुखरस्तत्र
हन्यते ४५ त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्यजेत् ४६
पंचयत्रनविद्यंतेनतत्रदिवसंवसेत् धनिनःश्रोत्रियोराजानदीवैद्यस्तुपंचमः ४७ अनायकेनव
स्तव्यंनवसेद्बहुनायके आत्मनःशांतिमन्विच्छन्नवसेद्बालनायके ४८ सर्वेयत्रविनेतारःसर्वेपंडि
तमानिनः सर्वेमहत्त्वमिच्छंतितद्वृंदमवसीदति ४९ घटंभिद्यात्पटंछिंद्यात्कुर्याद्रासभरोहणं येन
केनाप्युपायेनसर्वज्ञातःपुरंवसेत् ५० नहीदृशंसवलनंत्रिषुलोकेषुविद्यते दयामैत्रीचभूतेषु
दानंचमधुराचवाक ५१ विवादोधनसंबंधोयाचनंस्त्रीषुसंगतिः अदानमग्रतःस्थापिमैत्रीभंग
स्यहेतवः ५२ दर्शितानिकलत्राणिगृहेसुप्तमशंकितं कथितानिरहस्यानिसौहृदंकिमतःपरं
५३ नमातरिनदारेषुनसोदर्येषुबंधुषु विश्रंभस्तादृशःपुंसांयादृग्मित्रेनिरंतरं ५४ शोकाराति
परित्राणंप्रीतिविश्रंभभाजनं केनरत्नमिदंसृष्टंमित्रमित्यक्षरद्वयं ५५ दुःखेनश्लेषमेतेमित्रंह्यस्ति

207

हृदुःखेनभिद्यते भिन्नश्चिरस्थातुयाप्रीतिः सादुःखैकप्रदायिनी ५६ मातामित्रंपिताचेतिस्वभावा
त्रितयंहितं कार्यकारणतश्चान्येभवंतिहितबुद्धयः ५७ ययोरेवसमंवित्तंययोरेवसमंकुलं तयोर्मै
त्रीविवाहश्चनतुपुष्टविपुष्टयोः ५८ चिवुकेयस्यलोमानिनवक्षसिनगल्लयोः तेनमैत्रीनकर्त
व्यायदिनिर्मानुषंजगत् ५९ दानेतपसिसौर्येचयस्यनप्रथितंयशः विद्यायामर्थलाभेवातस्य
जन्मनिरर्थकं ६० परोपकारशून्यस्यधिग्मनुष्यस्यजीवितं जीवंतिपशवोयेषांचर्माप्युपकरिष्य
ति ६१ तरवःकिंनजीवंतिभस्त्राःकिंनश्वसंतिच पशवःकिंनखादंतिकिंनमेहंतिचापरे ६२
पन्नगाःसंतिवहुशोभेकभक्षणतत्पराः सएकःशेषनागोस्तिभूधरधरणक्षमः ६३ यज्जीव्यते
क्षणमपिप्रथितैर्मनुष्यैर्विज्ञानविक्रमयशोभिरभग्नमानः तन्नामजीवनफलंप्रवदंतिसंतः
काकोपिजीवतिचिरंवलिमेवभुंक्ते ६४ किंतेनजातुजातेनमातुर्यौवनहारिणा आरोहतिनयः
स्वस्यवंशस्याग्रेध्वजोयथा ६५ अजातमृतमूर्खेभ्योमृताजातौसुतौवरौ यतस्तौस्वल्पदुःखायया

श्रा· 208

१०३

वज्जीवंजडोदहेतु ६६ नपुत्रःपितरंद्वेष्टिस्वभावात्स्वस्यरेतसः ब्राह्मणानांहिविद्वेषीजायतेन्यस्य
रेतसः ६७ यःसुतःपितरंद्वेष्टितंविद्यादन्यरेतसंयस्तुनारायणंद्वेष्टितंविद्यादन्यरेतसं ६८ नपु
त्रत्वेनपूज्यंतेगुणैरासाद्यसंपदं रवेर्व्यापारमादत्तेप्रदीपोनपुनःशनिः ६९ किंकुलेनविशालेन
शीलमेवात्रकारणं कृमयःकिंनजायंतेकुसुमेषुसुगंधिषु ७० गुणाःसर्वत्रपूज्यंतेगुणिनां
तत्रकागतिः नग्नक्षपणकग्रामेरजकःकिंकरिष्यति ७२ नापात्रेपात्रकार्यस्यात्त्रयाणांप्रभुगौर
वं सुधास्त्रावीसमःसोमःशनिरंतेकृतोमुना ७३ उत्तमाश्चात्मनाख्याताःपितुःख्यातास्तुमध्यमाः
अधमामातुलैःख्याताःश्वसुराच्चाधमाधमाः ७४ ज्येष्ठोभ्रातापितृसमोमृतेपितरिसर्वदा सर्वेषां
वृत्तिदातास्यात्सहन्यात्परिपालयेत् ७५ कनिष्ठास्तंनमस्येरन्सर्वेछंदानुवर्तिनः तमेवमुपजीव्ये
रन्यथैवपितरंतथा ७६ विभागेचसमानास्तेपितुर्द्रव्यस्यकेवलं लघोःपूर्वतरोयस्तुगुरुःस
हिनिगद्यते ७७ ऋणशेषश्चाग्निशेषःशत्रुशेषस्तथैवच पुनःपुनःप्रवर्तंतेतस्माच्छेषंनरक्ष

रामः

१०३

209

येत् ७९ कुभोज्येनदिनंनष्टं कुकलत्रेणशार्वरी कुपुत्रेणकुलंनष्टंतन्नष्टंयन्नदीयते ७९ चतुरः
सृजतापूर्वमुपायास्तेनवेधसा नसृष्टःपंचमःकोपिगृह्यंतेयेनयोषितः ८० स्त्रियस्त्रयःकामपतेः
सन्निकर्षचगच्छति ईर्ष्यांचकुरुतेसेवांततमिच्छंतियोषितः ८१ यदैवभर्त्ताजानीयान्मंत्रमूलपरां
स्त्रियं उद्विजेतततदैवास्याःसर्प्पाद्वेश्मगतादिव ८२ वर्वरश्चतपस्वीस्याच्छूरःस्यादकृतव्रणः
मद्यपास्त्रीसतीराजन्नितिनश्रद्दधामहे ८३ जल्पंतिसार्द्धमन्येनपश्यंत्यन्यंसविभ्रमं हृदयेचिंत
यंत्यन्यंनस्त्रीणामेकतोरतिः ८४ नाग्निस्तृप्यतिकाष्ठैस्तुनापगाभिर्महोदधिः नांतकःसर्वभूतैस्तु
नपुंभिर्वामलोचना ८५ स्थानंनास्तिक्षणोनास्तिनास्तिप्रार्थयितानरः तेननारदनारीणांसतीत्व
मुपजायते ८६ साभार्यायाप्रियंब्रूतेसपुत्रोयत्रनिर्वृतिः तन्मित्रंयत्रविश्वासःसदेशोयत्रजीव्य
ते ८७ लक्ष्म्यापरिपूर्णोहंनभयंमेस्तीतिमोहनिद्रैषापरिपूर्णस्यैवेदोर्भवतिभयंसिंहिकासूनोः
८८ अतिपरिचयादवज्ञासंततगमनान्निरादरोभवति लोकःप्रयागवासीकूपेस्नानंसमाचरति

८९ व्रजत्यधः प्रयात्युच्चैः नरः स्वैरेव चेष्टितैः अधः कूपस्य खनक ऊर्द्ध्वं प्रासादकारकः ९० अतिपा
रिचयाद्दवज्ञा हृति संगाद्दनादरो भवति मलये भिल्लपुरंध्री चंदनतरुमिंधनं कुरुते ९१ एतेनीति
शास्त्रेभ्यो भारताद्ब्राणिक्यादन्यरव्यानाञ्च ब्राह्मे मुहूर्ते पुरुषस्य ज्ञेन्निद्रामतंद्रितः नरं प्रातः प्रवुद्धं हि
श्रयति श्रीर्गुणाश्रया ९२ नोत्तरस्यां प्रतीच्यां च कुर्वीत शयने शिरः शय्याविपर्य्ययाद्दुर्भोदितेः शक्रे
णाद्वारितः ९३ न कुर्यात्परदारेच्छां विश्वासं स्त्रीषु वर्ज्जयेत् हतो दशास्यः सीतार्थी हतः पत्न्याविदू
रथः ९४ न मद्यव्यसनैः क्षीवः कुर्याद्देकाल विप्लवं द्वयोहियुः क्षीवास्त्वरण प्रहरणैः स्वयं
९५ दानं सत्वाश्रितं दद्यान्नपश्चात्तापवान्भवेत् वलिनात्मार्पितो वंधे दानशोषस्य शङ्कये ९६
ब्राह्मणान्नावमन्येत ब्रह्मशापोति दुस्सहः तक्षकाग्नेगतः कोपाद्ब्राह्मणस्य परीक्षितः ९७ दंभा
रंभोद्यतं कर्मनाचरेदिह निःफलं ब्राह्मणां दंभलब्धा स्तु विद्याकर्णस्य निःफलाः ९८ न स्त्रीजि
तः प्रमूढः स्याद्ब्राढरागवशीकृतः पुत्रशोकाद्दशरथो जीवं जायाजितो त्यजत् ९९ द्विपेद्वाक्यश॰

211

तान्घोरान्नपारुष्यविषप्लुतान् वाक्पारुष्यरुषाचक्रेभीमः कुरुकुलक्षयं १०० परेषांक्लेशदंकु
र्यान्नपैशुन्यंप्रभुप्रियं पैशुन्येनगतोराहोश्छेद्रांकौभद्ररणीयता १०१ कुर्यान्नीचजनाभ्यस्तानपा
चांमानहारिणीं चलिप्रार्थनयाप्रापलघुतांपुरुषोत्तमः १०२ वक्रैः क्रूरतरैर्लेख्यैर्नकुर्यात्प्रीति
संगतिं वसिष्ठस्यहरद्धेनुंविश्वामित्रोनिमंत्रितः १०३ तीव्रेतयसित्लीनानामिंद्रियाणांनविश्वसे
त् विश्वामित्रोपिसोत्कंठोमेनकावशमागतः १०४ भक्तंरक्तंसदासक्तंनिर्दोषंनपरित्यजेत् रा
मस्त्यक्त्वासतींसीतांशोकशल्याकुलोभवत् १०५ नक्रोधाज्ज्ञातुधानस्यसीमामिच्छेद्विधेयतां
निपीतभ्रातृरुधिरः प्रायनिंदांवृकोदरः १६ वर्जयेदिंद्रियजयेनिर्जनेजननीमपिपुत्रीकृतो
पिप्रद्युम्नः कामितः शंवरस्त्रिया १०७ प्रभुप्रसादेविश्वासंनकुर्यात्स्वप्नसन्निभे नंदेनमंत्री
निक्षिप्तः शकटालोहवंधने १०८ नलोकायतवादेननास्तिकः स्याददैवतः हरिर्हिरण्यक
शिपुंजघानस्तंभनिर्गतः १०९ अप्युन्नतपदारूढः पूज्यान्नैवापमानयेत् नहुषः शक्रतांप्राप्य

च्युतोगस्त्यापमानतः ११० हितोपदेशंयन्मशृणुयात्कुर्वीतचयथोदितं विदुरोक्तमकृत्वाभूत्कौ
रवः शोकशल्यभाक् १११ नपुत्रायतमैश्वर्य्यंकुर्यादार्यः कथंचन पुत्रार्पितप्रभुत्वोभूद्धतरा
ष्ट्रस्तृणोपमः ११२ श्रुतिस्मृत्युक्तमाचारंनत्यजेत्साधुसेवितं दैत्यानांश्रीवियोगोभूत्सत्यधर्म
क्रियामुचां ११३ नदीनांनखिनांचैवशृंगिणांशस्त्रपाणिनां विश्वासोनैवकर्तव्यः स्त्रीषुराज
कुलेषुच ११४ नकुर्यादभिचारेछांवश्यादिकुहकक्रियां लक्ष्मणेनेंद्रजित्कृत्याभिचारस
मयेहतः ११५ व्याकुलोपिविपत्यांतैः स्मरेद्धि स्सुंसदाहृदि शरतल्पगतोभीष्मः सस्मारगरुड
ध्वजं ११६ एतेद्वेमेंद्रस्यसंदहोवैस्मवेमार्गेनकार्योन्यैः कुदर्शनैः रामप्रभावमद्यापियतोब्धौ
पश्यसेतुना ११७ शार्ङ्गधरस्य इतिश्रीशार्ङ्गधरपद्धत्यांनीतिपरिछेदश्चतुःसप्ततितमोध्यायः
७४ अथमिश्रकनीतिः मणिःशाणोल्लीढःसमरविजयीहेतिनिहतोमदक्षीणोनागः सरिद्
सरितःश्यानपुलिना कलाशेषश्चंद्रः सुरतमृदितावालवनितातनिम्नाशोभंतेगलितविभवाश्चा

213

र्थिषु नराः १ शशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृ
तेः प्रभुर्धनपरायणः सततदुर्गतः सज्जनो नृपांगणगतः खलो मनसि सप्त शल्यानि मे २ ए
तौ भर्त्तृहरेः अविधेयो भृत्यजनः शठानि मित्राण्यदायकः स्वामी अविनयवती च भार्या मस्त
कशूलानि चत्वारि ३ स्वामिनि शक्तिसमेते गुणवति भृत्ये प्रियासु नारीषु सुहृदि निरंतरचि
त्ते निवेद्य दुःखं सुखी भवति ४ दुर्जनविभववियोगे प्रियजनसंदेशितानि वाक्यानि कथिता
न्यपि कथ्यपसरवपुनरपि तानि तान्येव ५ शक्तिरहितोपि कुप्यति सेवासक्तोपि मानमुद्वहति
अधनोपि हि कामयते जानाति विधिर्विडंबयितुं ६ दौर्मंत्र्यात् नृपतिर्विनश्यति यतिः संगात्सुतो
लालनाद्विप्रोनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् मैत्री चाप्रणयात्समृद्धिरनया
त्स्नेहः प्रवासाश्रयात्स्त्री मद्यादनवेक्षणादपि कृषिस्त्यागात्प्रमादाद्धनं ७ कोर्थान्प्राप्य न गर्वि
तो विषयिणः कस्यापदोस्तं गताः स्त्रीभिः कस्य न खंडितं भुवि मनः को नाम राज्ञां प्रियः कः का

त्नस्यनगोचरांतरगतः कोर्थीगतोगौरवं कोवादुर्जनवागुरासुपतितः क्षेमेणजातःपुमान् ८ क्लीवे
धैर्य्यमघपेतत्वचिंतासर्प्पे क्षांतिस्त्रीषुकामोपशांतिः काकेशौचंद्यूतकारेषुसत्यंराजामित्रंकेनदृष्टं
श्रुतंवा ९ मांसंमृगाणांदशनौगजानांमृगद्विषांचर्मफलंद्रुमाणां स्त्रीणांहिरूपंचनृणांहिरण्यमे
तेगुणावैरकराभवंति १० स्तब्धस्यनश्यतियशोविषमस्यमैत्रीनष्टक्रियस्यकुलमर्थपरस्यधर्मः
विद्याफलंव्यसनिनः कृपणस्यसौख्यंराज्यंप्रमत्तसचिवस्यनराधिपस्य ११ शाठ्येनमित्रंकपटे
नधर्मंपरोपतापेनसमृद्धिभावं सुखेनविद्यांपरुषेणनारींवांछंतियेव्यक्तमपंडितास्ते १२ धातुवा
देषुवित्ताशामोक्षाशानास्तिकेमते यामातरिचपुत्राशात्रयमेतन्निरर्थकं १३ किंशुकादपिगंधा
शामांशशासामशकादपि कृपणादपिवित्ताशाद्याशातस्यदुर्मतेः १४ राजाघृणीब्राह्मणःसर्वभ
क्षीस्त्रीचवश्यादुष्टबुद्धिः सहायः प्रेष्यःप्रदीपोधिकृतःप्रमादीत्याज्याइमेयश्चकृतंनवेत्ति १५
वैद्यंपानरतंनटंकुपठितंस्वाध्यायहीनंद्विजंकुयुद्धेकापुरुषंहयंगतरयंमूर्खंपरिव्राजकं राज्यं

215

वाल्लनपंचमंजिरहितंमित्रंछलान्वेषिणं भार्यायौवनगर्वितांपररतांमुचंतितेपंडिताः १६ वृ
क्षंक्षीणफलंत्यजंतिविहगाः शुष्कंसरंसारसानिर्द्रव्यंपुरुषंत्यजंतिगणिकाभ्रष्टंनृपंमंत्रिणः पुष्प
पर्युर्षितंत्यजंतिमधुपादग्धंचनांतंमृगाः सर्वःकार्यवशाज्जनोभिरमतेकः कस्यचावल्लभः १७
फलतिविटपेशाखाभंगंकरोतिशिखंडिनः चतुरगमनोजात्योयोश्वःसगौरिववाह्यतेगुणवति
जनेप्रायेणैतेगुणाःखलुदूषणं १८ त्यजतिभयमकृतपापंमित्रंचशठः प्रमादिनंविद्या द्यूतका
मिनमलसश्रीःक्रूरंस्त्रीदुर्जनंलोकः १९ द्वाविमौपरुषैलोकेपरप्रत्ययकारकौ स्त्रियःका
मितनित्योलोकःपूजितपूजकः २० द्वाविमौपुरुषौलोकेस्वर्गस्योपरितिष्ठतः प्रभुश्चक्षमया
युक्तोदरिद्रश्चप्रदानवान् २१ द्वाविमौपुरुषौलोकेसुखिनौनकदाचन यश्चाधनःकामय
तेयश्चकुप्यत्यनीश्वरः २२ द्वाविमौपुरुषौलोकेनभूतौनभविष्यतः प्रार्थितोयश्चकुरुतियश्चना
र्थयतेपरं २३ द्वाविमौपुरुषौलोकेशिरःशूलकरौपरौ गृहस्थोयोनिरारंभोयतिश्चसपरिग्रहः

शा. 216
१२२

२४ द्वाविमावंभसिक्षेप्यौगालेबध्वागलेशिलां धनिनंचाप्रदातारंदरिद्रंचातपस्विनं २५ संत
श्चेदमृतेनकिंयदिखलस्तत्कालकूटेनकिंदातारोयदिकल्पशाखिभिरलं यद्यर्थिनःकिंतृणैः
किंकर्पूरशलाकयायदिदृशः पंथानमेतिप्रियः संसारेपिसतींद्रजालमपरंयद्यस्तितेनापिकिं
२६ लोभश्चेदगुणेनकिंपिशुनतायद्यस्तिकिंपातकैः सत्यंचेत्तपसाचकिंशुचिमनोयद्यस्तिती
र्थेनकिं सौजन्यंयदिकिंगुणैः सुमहिमायद्यस्तिकिंमंडनैः सद्विद्यायदिकिंधनैरयशोयद्यस्ति
किंमृत्युना २७ मित्रंस्वच्छतयारिपुंनयवलैर्लुब्धंधनैरीश्वरं कार्येणद्विजमादरेणयुवतिंप्रे
म्णातितीव्रंस्तवैः वंधुंक्षांततयागुरुंप्रणतिभिर्मूर्खंकथाभिर्वुधं विद्याभीरसिकंरसेनसकलं
शीलेनकुर्याद्वशं २८ केषामप्येते वाजीचारुगतिःशशांकधवलं छत्रंप्रियाप्रेमतः श्रोतुं
गस्तनमंडलाविजयिनोभृत्याःपुरःपंचषाः तांवूलप्रचुरंसखासुचतुरः संपद्यतेचेत्पर्य्यग्राऊस
त्कटकप्रयाणमितरन्त्राणप्रयाणंवुधाः २९ कस्यापिजर्वैहिसन्नेःपरमंचिभूषणंत्रपांगनायाः

रामः
१११

217

जाः मुनिशापाद्गताभूमौततोजातावनेचराः २ भद्रोमंदोनृगोमिश्रस्तनुर्द्वीजायतेगजः

जाः मुनिशापाद्गताभूमौततोजातावनेचराः ३ शार्ङ्गधरस्यैते यतः सत्यंततोधर्मोयतोधर्मस्ततो

...येभूवन्मिश्राकलिपुरेगजाः ३ शार्ङ्गधरस्यैते

...पंततः शीलंयतोनागास्ततोजयः ४ यद्वद्धनमसिंहंचयद्वद्राष्ट्रमपार्थिवं यद्वच्छो

...हत्सैन्यमकुंजरं ५ प्राकारगोपुराट्टालकपाटोद्घाटनादिषु भंजनेमर्दनेचैववना

...मताः ६ शूरजालोचितमुखः कोन्यः शक्तः परंगजात् हंतुंप्राकारमुन्मथ्यरथ्याश्च

... एकेशक्तिप्रहारेणाम्रियतेऽश्वोनरोपिच सहेन्महाप्रहाराणांशतंयुद्धेषुवारणः

...ंद्रणांजलेपुष्पितवापीवसीदति ...तिगजाहस्तैर्लग्नपुष्करपुष्करैः ९ स्त्रियोवतार

...ध्वनिश्चलाः ...तुरतांव्रजेत् ३३ ...स्तिहस्तिसमः सखा १० चीत्कारैर्नाशयंतः

...मेनामोदयंतोम...श्रीभवेद्गजः ३४ ...स्वबलवहलतांवाटमाशोकयानाः शुंडादंड

...ममपिवलंयथाशाख्यवत्कुर्यात्सुत्रवत्प...द्राभुविविजयविधौनेमतांभूमिपालः ११ च

गमः

११२

शा॰ यस्विनः द्विह्ना विमावंभसिन्ने य्यौ गातं व ... क्रमः शास्त्रवलोपजीविनां ३० पांडवकुलस्य

१२१ ... म्तु र्वसंततसम किंयदिरवलं ... काल ... कः कुसुमायुधः परिमलः कास्तूरिकोस्त्र

... करसोज्वला ... गाकयायदिह्शः पंपा ... तनं मार्गः शांभवएवपंचमलयागीतिः कवि

... ह्णस्य इंदुं कै ... तकिंपिभनता ... पटली वांभोजिनी वांधवं मेघं चातकमंडली

... पुष्याकरं माकंदपिकसुंदरीवतरुणीप्राणेश्वर प्रोषितं चेतोवृत्तिरियं मम

... मुत्कंटते ३२ नित्यं ब्रह्मयथास्मरंति मुनयोहंसायथामानसं सानंदाः स्फु

... नपुत्रा ध्यायंतिरे योगजाः युष्मद्दर्शनलालसा प्रतिदिनं युष्मान्स्मरामो वयं धन्यः

... रास्त्रि भविता यत्रावयोः संगमः ३३ एतौ श्रीराघवचैतन्यश्रीचरणानां इतिश्रीशा

... मिश्रकनीतिपरिच्छेदः पंचसप्ततितमः ७५ अथगजप्रशंसा यतोगजैर्विनाराज्ञां

... नुजायते जयप्रतापौ सैन्यस्यरह्मातस्मादिहोच्यते १ पुरास्वर्गेसुरवेनासन्कामगाः

219

गतिः क्रमः संमील्य लोचने नित्यं निद्रां धइवगछति २६ धीरोनुरक्तो हास्तिन्यां गतो द्वेगो जितश्रमः निर्भयो मंदवुद्धिश्च धृतिमान्मंदउच्यते २७ अथ मृगलक्षणानि तनुत्वक्कर्णपादोयस्तन्वास्यस्तनुमेहनः तनुवंशोदरश्चैव तनुव्यक्ततनूरुहः दीर्घजीह्व विषाणश्च दीर्घगात्रस्तथोरसः प्रध्वस्तरोमकर्णत्वक् पुरस्ताश्चापि संवृतः निपाते गोचरस्थाने शय्यायां च यनिर्वृतः रूपाभिभवशंकी च नित्यमेवानवस्थितः ह्रस्वश्रवणलांगूलो दीर्घविक्रमतेक्रमैः पुनः पुनश्च विनदंन्दुमेतिश्चापि धावति ३१ अथ मिश्रकलक्षणं वद्धशीवद्धलीकश्च दंडपातेषु चाक्षमः गछेत्त्वरूपवेगश्च भारं प्राप्यावसीदति ३२ कृछ्राच्चाप्यायते नागः क्षिप्रं च परिहीयते कद्दम्लवणोश्चैव रूक्षैश्चानुरतां व्रजेत् ३३ नित्यं च सांत्वयेदेनं न चैनमभितापयेत् सर्वेषां लक्षणैकैश्चि धुक्तो मिश्रो भवेद्गजः ३४ अथ गजप्रक्रिया एवंविधान्गजान्ज्ञात्वा वनादानीय पार्थिवः विनये शिष्यवत्कुर्यात्पुत्रवत्परिपालयेत् ३५ शूरः शूरारूढः प्रतापवान् जयेदेकोपि मातं

220

शा॰
११४

गः षड्सहस्राणि वाजिनां ३७ शरतोमरचक्रैश्च गजस्कंधहता नराः त्वरणात्स्वर्गे प्रयांत्येव त
स्मात्स्वर्गोपमा गजाः ३८ एते बाल्यकाख्यात् इति श्रीशार्ङ्गधरपद्धत्यां गजप्रशंसा परिच्छेदः ष
त्यजन्ति तमः ७६ अथ तुरगप्रशंसा पुरा सपक्षा हरयो विचेरुः खेचराः किल गंधर्वेभ्यः समु
त्पन्नाः सदा स्वच्छंदचारिणः १ तेजो वाय्वंबुदृगणैः सर्वैर्लक्षितलक्षणाः वीत्यशक्रो जगा
देदं शालिहोत्रं महामुनि २ छिंधि पक्षान मीषां त्वं यथा सुर्वाहनाइमे इषी का स्त्रेण सोप्य
षां पक्षांस्तत्प्रीतये छिनत्त ३ ततः प्रसादितस्तैस्तु प्राहाद्भुरमिदं मुनिः युष्मत्पक्षात्परो वे
गश्चरणानां भविष्यति ४ यूयं शक्रादिदेवानां वाहनं त्वगमिष्यथ तथा भूमिपतीनां च गौरवे
णा समन्विताः ५ यो राज्ञा भवतां तुष्टिं रवाद्यपानादिभिः सह करिष्यति स सर्वत्र जयवादी भवि
ष्यति ६ अथागत्य भुवं राज्ञां गता वाहनतां हयाः तेषां धर्मार्थकामांश्च साधयंत्युपकारिणः ७
आमूलमंडलं यस्य गृहे संति न वाजिनः गृहभित्तिषु तेनापि लेख्या दुरितशांतये ८ अध्याय

राम
११४

221

स्वजयस्तस्ययस्याश्वास्तस्यमेदिनी अश्वायस्ययशास्तस्ययस्याश्वास्तस्यकांचनं ९ निपत्ययुधिवेगेनभिषतांयुधिधन्विनां शत्रुंनिहत्ययात्येकःशूरोवाजिप्रभावतः १० शस्त्रास्त्रैर्भिन्नदेहोपिश्रांतोपिगुरुभारतः नमुंचतिरणेनाथमतःकोन्योहयात्पृथक् ११ दूरस्थोपिवलीशत्रुर्नशेतेरजनीष्वपि तस्यभीत्यागृहेयस्यहरयोवेगवत्तराः १२ नगजैर्नैर्नरैःकार्यसिद्धिमभ्येतिभूभृतां तथानिमिषमात्रेणयथावाहैःसुसाधितैः १३ शार्ङ्गधरस्यैते इत्यश्वप्रशंसा अथाश्वानांसामान्यलक्षणानि ब्राह्मणक्षत्रियविशांशूद्राणांचैवलक्षणैः ज्ञेयाहयोत्तमास्तेषुपूर्वःपूर्वःशुभावहः १ प्रायेणब्राह्मणःशुक्लःक्षत्रियोलोहितःस्मृतः वैश्यःपीताभवर्णःस्यात्कृष्णवर्णश्चतुर्थकः २ पुष्पगंधःसदाविप्रःक्षत्रियोगुरुगंधकः घृतगंधोभवेद्वैश्यपोमीनामोदीचतुर्थकः ३ विवेकीसघृणोविप्रस्तेजस्वीक्षत्रियोवली दुष्टभावस्तथावैश्यःशूद्रोनिःसत्वकातरः ४ ब्राह्मणःक्षेमकृत्येषुसिद्धिंगच्छतिवाजिनः क्षत्रियायुद्धकार्येषुवैश्याद्द्रव्यार्ज

शा. 222
२२५

नेसदा ५ मृदुश्चास्निग्धकृत्येषुत्वैवंवाजिनः सदा आरोहे युद्धकार्येषु यद्दंतेच्छाश्वतीश्रि
यं ६ सदासुशोभदंत्येवाजिनोयेतुभूतले जाग्रंत्यायोजनेप्राणैकर्करस्यचभदारो ७ सुलक्ष
यं ६ सदासुश्राभवंत्येवाजिनोयेतुभूतले जाग्रंत्यायोजनेप्राणैकर्करस्यचभदारो ७ सुलक्ष
णामहावेगाः ससत्वाश्चातिघस्मराः जितश्रमाविनीतायेराजाहीस्तेहयास्मृता ८ अथएष
गावयवानांलक्षणानि आताम्रोष्ठजितावाष्टौवलहीनौमृदुत्वचौ जिह्वारक्ताचतन्वीचतालर
क्तंप्रशस्यते १ यनस्निग्धाः सुवक्राश्चसमादंताः सुशोभनाः नातिदीर्घोष्ठपूनैवहनूवाहु
स्यशोभना अत्यंतनिर्गतेचैवसुवद्धेनैववाविले प्रशस्तेवाजिनांनेत्रेमध्यामेकालतारके ३
सावर्त्तंचविशालंचललाटंवाजिनांशुभं शस्तंशिरः सुसंवृतमावर्तद्वयभूषितं ४ ह्रस्वताक
र्णयोः शस्ताती क्ष्णाताततनुतातथा सुदृढांकुचितांदीर्घांशुभांग्रीवांविदुर्बुधाः ५ केसरंचजटा
हीनंमृदुदीर्घंप्रशस्यते आनावर्त्तोहृढश्चैवस्कंधोवाहस्यएजितः ६ उरोविशालंशंस्तंचकु-
क्षौदीर्घोन्नतेशुभे ऊरू वृत्तौसमौवाहूगूढंजानुप्रशस्यते ७ अवक्रेमांसहीनेचवाजिजंघे

राम:
२२५

223

सुप्रोभने कूर्चसमं सुगंधिः स्याद्रूपि व्रणविवर्जितं ... मंडूकिकाकृष्णावर्तुलाः पृथुलाः
खुराः प वश्मुन्नतौ ह्रस्वौ सुवृढौ च समौ शुभौ अवलंवि सुवृत्तं च जठरं वाजिनां शुभं नातिदीर्घं स
मं पृष्ठं किंचिच्च विन... शुभं १० एते पूर्णालिहो त्रस्यस्य पीना कटि सुवृत्त श्च पश्चाद्भागः पृथुः स्मृ
तः मृदुस्निग्धायतैर्युक्तं वालैः पुच्छं प्रशस्यते ११ वृषणौ च समौ वृत्तौ विल्वमात्रौ विलोम
शौ ह्रस्व वर्ण विहीनं च द्वस्वं मेहनमिष्यते १२ अथाश्वानां मानलक्षणानि ऊर्द्धं व्रीहि
त्रयं मानं मंगुलस्य निगद्यते हस्तोपि हि समाख्यातश्चतुर्विंशतिरंगुलैः १३ द्वाविंशत्यंगुलं व
... मुख... मानं वस्य कीर्त्तितं अंगुलद्वयहीनं तु म... वाजिनः ततो द्व्यंगुलनूनं कनिष्ठस्य
... ग्रीवा तमस्य वाहस्य षट्पंचाश... काः मधुजाले ... चत्वारिंशत्षडधिकाम ध्यमाश्व
स्य कीर्त्तिता षड्विंशदंगुले ग्रीवा हीना ... राग्रे तदा धार्यो रक्तच ... पृष्ठकटि श्चैव मुखं तु तुल्यं समादि
शेत् कर्णौ सप्तांगुलौ प्रोक्तौ तालुकं च षड् ... देशान्व ... स्तुः ... उच्छ्रदंडः कथितो विंशदंगुलः
... कायारसीकस ...

224

शा
११६

द्वाविंशत्यंगुलोत्सेधे जंघे चैवोत्तमे स्मृते १७ जिनः सप्तदशो मुखे हीने चैव चतुर्दशे सप्तांगुलः
खुरः प्रोक्त उत्तमाश्वस्य पंडितैः १८ षडंगुलागंत्यायोजन प्राज्ञेकः पंचसप्तमितः चतुर्हस्तश्च वि
णामसा... हयोत्तमः १९ अर्द्धहस्तेन हीनश्च माविनीतायेराजा...मः ततो हस्तेन हीनश्च हीना
श्वस्य सं...यः स्मृतः २० पंचहस्तप्रमाणेन दैर्घ्येणवुत्तदीनोमाने चतुर्भिर्मध्यमे प्रोक्तं त्रिभिः सा
र्द्धैस्तथाधमे २१ अपांगात्पुच्छमूलं तु तिर्यगश्वप्रमाणयेत् खुरांतात्ककुदं यावदूर्द्धमाने नवु
द्धिमान् २२ अथ हयानां शुभलक्षणानि अथातः संप्रवक्ष्यामि लक्षणानीह वाजिनां शुभा
नि वर्णैरावर्त्तैस्तानि विद्याद्विचारतः २३ सर्वश्वेतो हयो यस्तु श्यामैकश्रवणो भवेत् स वाजी वा
जिमेधार्हः श्यामकर्णः प्रशस्यते २४ यस्य पादाः सिताः सर्वे तथा चक्रं च मध्यतः कल्याणपंच
कः प्रोक्तः सदा कल्याणकृत्तमः २५ यस्य पादाः सिताः सर्वे पुच्छं च क्षोमुखं तथा मूर्द्धजाश्च सि
तायस्य तं विद्यादष्टमंगलं २६ मुखे चंद्रकसंवीतो ह्यस्फलसमाकृतिः श्वेतपादः स विज्ञेयो

राम:
११६

225

घरस्यैते अश्वानांशुभाशुभदोसुभस्तर्बुधाः कथयंताशुद्धाश्रीवेयदिवाशुभंस्वामिनोवा
जिनांचिह्नैस्तांहिह्नैर्येयोचिचक्षणैर्ह्रषंडे यःसंनद्धोहयोरावमूर्द्धवक्त्रः करोतिवा खुराग्रेणक्षि
खन्भूमिंसशंसतिरणेजयं ४८ यःकरोत्यसकृन्मूत्रपुरीषंवाश्रुमोचनं ससंसतिपराभूति
मत्यंतयश्वदुर्मनाः निःकारणंनिशांतेयोह्वेषारावंकरोत्यपिपरचक्रागमाशंसीसविज्ञेयोवि
चक्षणैः ५० पुलकांकितपुच्छोयोजायतेयस्यघोटकः सशंसतिस्थिरस्यापिदुतंतस्यप्रयाण
कं ५१ स्फुलिंगायस्यदृश्यंतेपुच्छतोश्वस्यवह्निजाः निर्गच्छतःप्रभोर्नाशंससंसतिनिशागमे
५२ अश्वशालांसमासाद्ययदांतर्मधुमक्षिकाः मधुजालंप्रवध्नंतिम्रियंतेश्वास्तदाध्रुवं ५३
सरटंचारयेद्यत्नात्प्रविशंतंहयालये मंदुराग्नेतदाधार्यरक्तचक्रोमहानपि ५४ नकुलस्यैते
अश्वानांजन्मदेशाः अश्वानांजन्मदेशान्प्रवक्ष्याम्यनुपूर्वशः उत्तमानांचमध्यानांहीना
नांयत्रसंभवः ५५ उत्तमास्ताजिकाःप्रोक्तायारसीकसमुद्भवाः कोक्कणःखत्तलाणश्चतथा

सौराष्ट्रजाहयाः ५६ अथमध्यमाः उरोजाताश्चकीराश्चतुरष्कारदजाश्चये हक्कजाः सैंधवाम
ध्याः स्थलजातास्तथाहयाः ५७ अथहीनाः पुंभल्ला श्चार्जल्लाश्चैवतथासारस्वताः हयाः अध
माष्टांकरणः सर्वेयेचप्राग्दक्षिणोद्भवाः ५८ अथाश्ववाहनविधिः अथातः संप्रवक्ष्यामिहया
रोहणमुत्तमं येनविज्ञानमात्रेणवहतः प्रियतांव्रजेत् ५९ रूपावर्तगतिछायाः सत्ववर्णोव
योवलं वेगहीनस्यवाहस्यसर्वमेतान्निरर्थकं ६० तस्माद्वेगजितंवाहंतरुणंपुष्टविग्रहं वा
हयेद्वाहकः सज्जास्करंगंसात्वयन्मुहुः साङ्गांसुकटिनांचैवपाषाणोदकसंपुतां तृणकाष्ठ
युतांचैवरणभूमिंचवर्जयेत् ६२ समाचविपुलाचैवकिंचित्पांशुसमन्विता एकांतेविजने
चैवरंगभूमिप्रशस्यते ६३ स्थूलश्चक्रोधनोमूर्खोभीतोकामवल्लासनः अस्थानदंडपा
तीचसोतमोवाहकः स्मृतः ६४ [illegible]किशल्यपादः करणमध्यैकदृष्टिर्नचलतिकटिदेशे
स्वासनेसंस्थितश्चहयहृदयमर्मविचंद्र[illegible]नदंडावपातीस[illegible]रगयोत्काहज्यतेपार्थिवेंद्रैः
२५ पत्र [illegible]हकः।

रजीविभः ८५ नविकिरंतियेग्नासंसुभद्रा: ह्रस्वमेहना: महाशिरोललाटाश्ववाजिनश्चिर
जीविनः ८६ अर्द्धप्रोथास्थितारेखादृश्यंतेयस्यवाजिनः तस्यमृत्युःसमुद्देश्यः दशमंप्राप्यवत्स
रं ८७ अंगुलायांदध्माईन वर्षाणांतस्यजीवितं: जीवेत्त्रयोदशाब्दानियस्यस्याच्चतुरंगुली ८८
विनतःपूर्वकायेनस्थूलजानुश्चयोहयः भूणादिकूटःसध्वान्तःस्वल्पायुःसप्रकीर्त्तितः ८९
जयदत्तस्यैते अथौषधानिवाजिनांकृते व्योषा--- विडंगहिंगुकुटजत्वक्केतकीसैंधवं प्या
मासर्षपदीप्यकादशगुणंमासंरसोनासमं संधायाम्लरसैर्लभेतसततंयोविघुदारव्यभिमांसप्तिः
सप्तयुगादिकोद्विदशनः सस्यादपास्यामयान ९० इतिविजुलीनकुलस्य दूर्वाघृतंयवानीरंशि
शिरंसर्वदाशुभं हरीतकीहितानित्यंलवणंत्रिदिनांतरे ९१ अथपरीक्षाश्वस्य असितखुरच
तुष्कःश्यामलग्नेषिपादःस्रवतिकरसमीयेमूत्रधारांसचेगंदशनचलखलीनः कुक्कुटस्कंध
बंधःकिटिवरकठिनोरुर्दूरगःस्यात्तुरंगः ९२ सबलविपुलकायोभर्तुरादेशवर्त्तीसमरविजय

228

शा.
१२९

संपत्कारकः स्यात्तुरंगः विकसद्दसितनेत्रः स्निग्धगंभीरहेषस्त्वरितचतुरगामी वायुवेगः ससत्वः
८ ३ इति श्रीशार्ङ्गधरविरचितायां पद्धत्यां तुरगप्रशंसापरिच्छेदः सप्तसप्ततिमः ७७ अथ खड्गलक्षणं
खड्गाल्लक्ष्मीस्तथा राज्यं यशः खड्गादवाप्यते खड्गाद्वैरिविनाशं च पल्लात्तद्दृभिदध्महे १ नकुल
स्य अथ लक्षणानि लोहानां लक्षणं वक्ष्ये यथोक्तं मुनिपुंगवैः निरंगसांगभेदेन ते लोहा विधा मताः
१ निरंगाः कांचियाद्याद्दिभेदाद्बहुविधा मताः रसकर्मसु ते शस्ता नानाव्याधिविनाशनाः २ व
स्यंते प्रायशो यस्मात्सांगाः खड्गादिकर्मसु नाम भेदेन चिह्नानि लोहानाम भिदध्महे ३ सुदांगसु
हृद्रूपस्य नीलमीषत्प्रतीयते रोहिणीतां विजानीत्तल्लक्षणे वहु वेदना ४ नीलपिंडसमांगं च नील
पिंडं विदुर्बुधाः मयूरकंठसंस्यामं मंगं यस्य प्रतीयते मयूरवज्रकं प्राहुर्लोहशास्त्रविशारदाः ६
यस्मिन्त्तित्तिरपक्षाभमंगं लोहे प्रतीयते दुर्लभं नन्महामूल्यं तित्तिरांगं सुपांकजं ७ सुवर्णसदृ
शांकरात्वंगभूमिः प्रतीयते सुवर्णवज्रकं विंघाद्बहुमूल्यं महागुणं ८ अविच्छिन्नं सुसूक्ष्मं च

रा.सं.
१२

दूर्वीभांगंसुपाकंजंयस्मिन् शैवालमात्वानमाहुस्तंमुनिपुंगवाः ९ शुक्लेपार्श्वद्वयंयस्यमध्ये
स्वर्णसमांगकं धूमवत्सीमसंस्थानमौषलेवज्रकंविदुः १० मृणालनालप्रतिमंविवरैरप
संश्रितैः कांकोलवज्रकंप्राहुः स्वर्णांगंवज्रचिंतकाः ११ अंगंप्रतीयतेयत्रवहुग्रंथिसमन्वि
तं दुर्लभंतन्महामूल्यंग्रंथिवज्रकमुच्यते १२ लौहारावस्येते रूप्यपत्रसमाभूमिरंगंश्चे
तंप्रतीयते तंधवलिगिरिंपाडिंपांडिज्ञाः प्रविंदंतिहि १३ तन्वीपत्रावलीकालासौवज्रगा
सिपत्रीकाप्राहुः कालगिरिः पांडिल्लोहशास्त्रविशारदाः १४ धाराशुभाभवेद्यस्यमध्यंक
ज्जलसन्निभं कृष्णैरंगैश्चितंगात्रंविघात्कज्जलवज्रकं १५ सूक्ष्मरजतपत्राभमंगंकृष्णा
सिपत्रिका कुटीरकःसमिव्यातस्तस्तेश्वयपुर्भवेत् १६ केतकीपत्रसदृशमंगंयस्य
प्रतीयते विंघात्केतकिवज्रः रात्रलौहेप्रचक्षते १७ निरंगरौप्यपत्राभमीषन्नीलनिभंच
यत् दुर्लभंतन्महामूल्यंकांतिलोहंप्रचक्षते १८ अंगंदमनपत्राभमंगेयस्मिन्प्रतीयते

रा· 230

१२२

विंघातूमनवज्रेतुतीक्ष्णधारंमहागुणं २० कृष्णभूमिसुवर्णाभमीषद्वज्रांगसंगतं डाकुनीवज्र
केविंघात्कालसंज्ञमथापरे २१ जर्द्दगंकपिलाभासमंगंयस्मिन्प्रतीयते नकुलांगंतंविंघातस्य
शंतस्याहिनाशनं २२ आसीत्कामालिकायस्यत्तुद्धांगंकुटिलीकृतं सुद्रवज्रकनामानंप्राह
नागार्जुनोमुनिः २३ खड्गकोशस्य अंतर्गीटंचिह्नहीनंविशालंमध्येस्थूलंस्थूलधारातिती
क्ष्णं रक्षोवक्षः छेदनार्थंमहांतंकृत्वाखड्गंदेवराजोतिहृष्टः २४ वामनाख्यंमहांतंतुर्येनत
तुर्नजायते छेदेगाठंचिह्नहीनंप्राहुःखड्गंविचक्षणाः २५ घृष्टेयस्मिन्भवेत्खड्गेशरीरंप्रति
विंवितं अंगंपत्राभिधंखड्गंप्राहुःखड्गविचक्षणाः २६ एरंडवीजप्रतिममंगंयस्मिन्प्रतीयते
महिषाख्यः सवैखड्गोनीलमेघसमच्छविः २७ यस्यांगेस्थूणरेखाघनमसृणरुचिः सर्वतोव्या
प्यतिष्ठेद्धारातीक्ष्णातिसूक्ष्मा प्रविशति रुधिरस्पर्शमात्रेणखड्गः यस्यांभःपीयमानंशमयतिनि
खिलंव्याधिमाधिंसमग्रांवैरिश्रेणीविशातंप्रवदतिगिरिशोवज्रमेतद्द्विजादि २८ यंप्राप्यक्षि

राम

१२८

231

तिपः समग्रधरिणींशास्तिप्रशांतद्विषत्सार्थः कृतार्थीकृतनिखिलकुलः संपदावर्द्धमा
नः यास्मिन्नक्ष्मीः स्थिरात्मावसतिरतिपतिंसर्वलोकाधिनाथंहित्वातस्मात्प्रयत्नादयम॰
तुल्यगुणः पूजनीयोनरेंद्रैः २९ लौहरत्नाकरस्यै तेगुणदोषाश्चखड्गानांवक्ष्यतेक्रमशोम
या यान्विज्ञायबुधः कुर्यात्खड्गजालविवेचनं ३० अविज्ञातोधृतः खड्गः शुभसंपतिनाश
कः विज्ञातः सकलैश्वर्यदायकोभवतिप्रभोः ३१ तस्मात्तेषांगुणान्वक्ष्येययोक्तंमुनिपुंग
वैः ममैते अष्टगुणाः यस्ययस्यतुयच्चिह्नंतच्चेत्सर्वांगसुंदरं तंखड्गमुत्तमंप्राहुः सर्वसंपत्ति
कारकं ३२ अर्द्धचंद्राकृतिर्यस्मिन्खड्गेस्वाभाविकीभवेत् अपिदोषसहस्राणिहंतिचंद्र॰
स्तमोयथा ३३ गदाचक्रंतथाशूलंडमरुमंडलंतथा यत्रस्वाविकंरवड्गे सखड्गोनृपदुर्लभः
भः ३४ एकचरणोभवेद्यस्तल्लक्षणेकेनसंयुतः सखड्गराजोनृपतेर्विज्ञेयः शुभकारकः
३५ पीतंनीलंतथाहृष्टंसवुवीजाकृतितथा यच्चदाडिमवीजाभंतद्खड्गप्रवरंविदुः ३६ निं

शां 232
१२९

वकल्कोभवेद्यत्त्रराज्ञिंदिवविलेपतः मधुरोमधुवर्णाभःसखड्गोदेवदुर्लभः ३७ आहतेय
त्त्रमधुरोध्वनिःसमुपजायते एज्यःसखड्गोनृपतेःशत्रुसंचपनाशनः ३८ कांस्यस्वनइवा
भातियास्मिनखड्गेहतेध्वनिः खड्गोत्तमंतंवदतिगिरिशःशुभवर्द्धनं ३९ यास्मिन्खड्गेश
रीरंप्रतिफलतियथाखड्गराज्ञोभिवंघोवंघोयंदेवहंदैरपियदिसभवेद्दर्द्धचंद्रोपपन्नःना
नावर्णैर्युतंयत्सभवतिनृपतेःशत्रुनाशेकहेतुः सेतुर्लक्ष्मीप्रवाहेनिरविलारिपुकुलध्वं
सनेधूमकेतु ४० त्वोहरत्नाकरस्येते अपदोषाः खड्गेषुलक्षणायथाघेसुपेषुप्रकाशितं
तच्छुद्धंप्रभुसंपत्त्यैमिश्रितंशत्रुसंपदे ४१ यस्याधोदृश्यतेचिह्नंमध्येयेनप्रकाशते स्वहि
तार्थेनगृह्णंतितंखड्गंनरपुंगवाः ४२ यस्याग्रेदृश्यतेचिह्नंमध्येनाधोपिदृश्यते खड्गःमध्य
गुणंप्राहुःखड्गशास्त्रविशारदः ४३ अर्द्धोर्द्धेलक्षणंयस्यपरार्द्धेनैवदृश्यते अधमःसभ
वेत्खड्गःक्षितियानांभयावहः ४४ ऊर्द्ध्वोर्द्धेलक्षणंयस्यनाधोर्द्धेलक्षणंभवेत् तंखड्गं

रामः
१२९

233

मध्यमं प्राहुः खड्गशास्त्रविशारदाः तिर्यग्यस्य भवेच्चिह्नमपि सर्वांगगोचरं खड्गाधमं तं न

पतिर्दूरादेव विवर्जयेत् ४६ तिर्यक् चिह्नमधो र्ध्वं स्यादुपर्यर्द्धे न वा भवेत् नापकृष्टं न प्रकृ

ष्टं तं प्राहुः खड्गकोविदाः ४७ अर्द्धेर्द्धे वर्ण एकः स्यादूर्द्धार्द्धे भिन्नवर्णकः वर्णसंकरवान् ख

ड्गो नृपाणां भयवर्द्धनः ४८ आहते यत्र खड्गे स्याद्ध्वनिः काकस्वरोपमः अंत्राकुरध्वनिर्वा

स्यात्स वर्ज्यो नरपुंगवैः ४९ इति निखिलमुदारमर्थसार्थं प्रणिहितमेकमिहेव खड्गशास्त्रे

गिरिशमतमिदं निसेव्य चक्रे क्षितिपतिमंत्रिसमूहचक्रवर्ती ५० इति श्रीशार्ङ्गधरविरचि

तायां पद्धत्यां खड्गलक्षणपरिच्छेदः अष्टसप्ततितमः ७८ अथ खड्गप्रशंसा अतः परं प्रवक्ष्या

मि खड्गलक्षणमुत्तमं प्रधानदेहसंभूते दैत्यास्थिभिरिष्टम लोहं प्रधानं खड्गार्थं प्रशस्तं

तद्विशेषतः खदिरखदरिषिक वंशभूर्यारके षु च विदेहेषु तथांगेषु मध्यमग्रामवेदिषु सह

ग्रामेषु चीनेषु तथा कालंजरेषु च ३ लोहप्रधानं तज्ज्ञानं खड्गानां मृणु लक्षणं तीक्ष्णाः छे

दमहावेगाः दृढासूर्यारकोद्भवाः ४ असहाश्चैवविज्ञेयाः प्रभावंतोविदेहजाः अंगदेशोद्भवा
स्तीक्ष्णाः सहस्राः सुदृगास्तथा ५ लघवश्चतथातीक्ष्णामध्यमाग्रामसंभवाः असारालघ
वस्तीक्ष्णाश्चेदिदेसमुद्भवाः ६ सह्यग्रामोद्भवाः खड्गाः सुतीक्ष्णालघवस्तथा निर्व्रणानिर्मल
स्तीक्ष्णाश्चीनदेशसमुद्भवाः ८ कालंजराः कालसहास्तेषांवन्ह्याभिलक्षणां शतार्द्धमंगुला
नांतुश्रेष्टं खड्गप्रकीर्तितं ९ तदर्द्धमध्यमंज्ञेयंततोहीनंनकारयेत् प्रमाणाभ्यधिकंचैवछ
त्रवंशांतथैवच १० दीर्घः सुमधरः शब्दोयस्यखड्गस्यभार्गव किंकिणीसदृशास्तस्यधार
णींश्रेष्टमुच्यते ११ खड्गः पद्मपलाशाभोमंडलाग्राश्चशस्यते करवीरपलाशायः सदृश
श्चविशेषतः यहाघृतसुगंधाश्चपद्मोत्पलसुगंधिनः वर्णिकश्चोत्पलाकाराः सवर्णागगन
स्यच समांगुलस्थाः शस्यंतेव्रणाः खड्गेसुभार्गव श्रीहृक्षपर्वताकारालिंगपद्मनिभाश्चये
मांगल्यानांतथोन्येषांसदृशोयेचभार्गव काकोलूकसवर्णाभाविषमांगुलिसंस्थिताः वं

शानुगाः प्रशस्ताश्च न शस्तास्ते कदाचन २५ खड्गेन पश्येद्वदनं वृथा विवृणुयात् न च न चा-
स्य कथयेन्मूल्यं जातिदेशं कथंचन २६ उच्छिष्टो न स्पृशेत्खड्गं निशि कुर्यान्न शीर्षके दिवा च सं-
जयेद्देनं गंधमाल्यानुसंपदा २७ खड्गं प्रशस्तं मणिमहेमयुक्ते कोशे सदा चंदनचूर्णयुक्ते संस्था-
पयेद्भूमिपतिः प्रयत्नाद्रक्षेत्तथैनं सुशरीरवच्च २८ श्रीविष्णुधर्मोत्तरभाषितानि चिह्नानि खड्गे-
ष्व शुभाशुभानि विज्ञाय भूमिपतयः सदैव संधारयेयुः सुमुदे कृपाणं २९ इति श्रीशार्ङ्गधरवि-
रचितायां पद्धत्यां खड्गप्रशंसापरिच्छेदः एकोनाशीतितमोऽध्यायः ७९ अथ धनुर्वेदः ईश्वरोक्ताद्ध-
नुर्वेदाद्व्यासस्य सुभाषितात् पश्चाद्दाशरथे रचितो ग्रंथः संक्षेपतो मया १ विना शार्ङ्गधरादन्यो ध-
नुर्वेदार्थतत्त्ववित् यतः स्वप्ने निशिप्राप्ता प्राशिवा तत्त्वविचारणा २ अतः संदेहदोलायां दोलमीयं
न मानसं ग्रंथेऽस्मिन् चापचतुरैर्वीरैर्विंतामणौ क्वचित् ३ यस्याभ्यासप्रसादेन निश्चयं ते धनु-
र्द्धराः जेतारः परसैन्यानां तस्याभ्यासो विधीयतां ४ एकोऽपि यत्र नगरे प्रसिद्धः स्याद्धनुर्द्धरः त

तोयांत्परयोदूरंमृगाःसिंहभयादिव ४ अथधनुर्दानविधिः आचार्येणधनुर्देयंब्रह्मणेसुपरीक्षि
ते लुब्धेधूर्तेकृतघ्नेचमंदबुद्धौनदीयते १ ब्राह्मणायधनुर्देयंब्राह्मणेसुपरीक्षिते लुब्धेधूर्ते
कृतघ्नेचमंदबुद्धौनदीयते १ ब्राह्मणायधनुर्देयंखड्गंवैक्षत्रियायच वैश्यायदापयेत्कुंतंगदांशू
द्रायदापयेत् २ धनुश्चक्रंचकुंतंचखड्गंचछुरिकांगदां सप्तमंबाहुयुद्धंस्यादेवंयुद्धानिसप्तधा
३ ममैते अथाचार्यलक्षणं आचार्यःसप्तयुद्धःस्याच्चतुर्भिर्भार्गवःस्मृतः द्वाभ्यांचैवभवेद्योधः
एकेनगणकोभवेत् १ हस्तःपुनर्वसुपुष्योरोहिणीचोत्तरात्रयं अनुराधाश्विनीचैवरेवतीदशा
मीतथा २ जन्मस्थेचतृतीयेचषष्ठेचैवसप्तमेतथा दशमेकादशेचंद्रेसर्वचंद्रारणीकारयेत् ३
तृतीयापंचमीचैवसप्तमीदशमीतथा त्रयोदशीद्वादशीचतिथयस्तुशुभामताः ४ सूर्यवारः
शुक्रवारोगुरुवारस्तथैवच एतद्वारत्रयंधन्यंप्रारंभेशास्त्रकर्मणां ५ एभिर्दिनैस्तुशिष्यायगुरुः
शस्त्राणिदापयेत् संतर्प्यदानहोमाभ्यांसुरान्देवविधानतः ६ ब्राह्मणान्भोजयेत्तत्रकुमारीवाग्मने

237

कष्टाः तापसानर्चयेद्भक्त्या ये चान्ये शिवयोगिनः ७ अन्नपानादिभिश्चैव वस्त्रालंकारभूषणैः

गंधमाल्यैर्विचित्रैश्च गुरुं तत्र प्रपूजयेत् ८ कृतोपवासः शिष्यस्तु धृताजिनपरिग्रहः बद्धांज

लिस्तत्र यायेद्गुरुतो धनुः ९ अंगन्यासं ततः कार्यं शिवोक्तं सिद्धिमिच्छता आचार्येण च शिष्य

स्य पापघ्नं विघ्ननाशनं १० शिखास्थाने न्यसेदीशं बाहुयुग्मे च केशवं ब्रह्माणं नाभिमध्ये तु जंघ

योश्च गणाधिपं ११ प्रतिमंत्रः ॐ ह्रौं शिखास्थाने शंकराय नमः ॐ ह्रौं नाभिदेशे ब्रह्मणे नमः ॐ

ह्रौं जंघयोर्गणपतये नमः ईदृशं कारयेन्न्यासं येन श्रेयो भविष्यति अन्येपि दुष्ट मंत्रेण न हिंसंति

कदाचन १२ शिष्याय मानुषं चार्यं धनुर्मंत्राभिमंत्रितं कांडात्कांडाभिमंत्रेण दद्याद्धि दविधान

तः १३ प्रथमं पुष्पवेधं च फलहीनेन पत्रिणा ततः फलयुतेनैव मत्स्यवेधं च कारयेत् १४

मांसवेधं ततः कुर्यादेवं वेधो भवेत्त्रिधा एतैर्वेधैः कृतैः पुंसां शराः स्युः सर्वसाधकाः १५ वेध

नेचैव मांसस्य शरपातो यदा भवेत् पूर्वदिग्भागमाश्रित्य तदा स्याद्विजयी सुखी दक्षिणे कलहो

घोरो विदेशगमनं पुनः पश्चिमे धनधान्यं च सर्वं चैवोत्तरे शुभं ऐशान्यां पतनं दुष्टं विदिशोन्याः
श्च शोभनाः हर्षपुष्टिकराश्चैव सिद्धिदाः शास्त्रकर्मणि १८ एवं वेधत्रयं कुर्याच्छंखढुंदुभिनि
स्वनैः ततः प्रणम्य गुरवे धनुर्वाणं निवेदयेत् १९ इति धनुर्दानविः अथ चापप्रमाणं प्रथमं
योगिकं चापं युद्धचापं द्वितीयकं निजवाहुवलोन्मानात्किंचिदूनं शुभं धनुः १ वरं प्राणाधि
को धन्वी न तु प्राणाधिकं धनुः धनुषा पीड्यमानस्तु धन्वी लक्ष्यं न पश्यति २ अतो निजवलो
न्मानं चापं स्याच्छुभकारकं देवानामुत्तमं चापं ततो न्यूनं च मानवं अर्द्धपंचमहस्तं तु श्रेष्ठं चापं
प्रकीर्तितं तद्धि ज्ञेयं धनुर्दिव्यं शंकरेण धृतं पुरा तस्मात्परशुरामेण ततो द्रोणेन धारितं द्रोणा
द्गृहीतं पार्थेन ततः सात्यकिना धृतं ५ कृते युगे महादेवस्त्रेतायां चापि राघवः द्वापरे द्रोणविप्र
श्च दैवं चापमधारयत् ६ चतुर्विंशांगुलो हस्तश्चतुर्हस्तं धनुस्मृतं तद्भवन्मानवं चापं सर्वल
क्षणसंयुतं ७ त्रिपर्वं पंचपर्वं वा सप्तपर्वं प्रकीर्तितं नवपर्वं च कोदंडं चतुर्द्धा शुभकारकं ८

चतुष्पर्वं च षट्पर्वं मष्टपर्वं च वर्जयेत् केषांचिच्च भवेच्चापं चितस्तिनवसम्मितं ९ अतिजीर्णमप
कं च ज्ञाति घष्टतं पैवच दग्धं छिन्नं न कर्त्तव्यं वाह्याभ्यंतरहस्तकं १० गुणहीनं गुणाक्रांतं कांडसै
न्यसमन्वितं गलग्रंथि न कर्त्तव्यं गलमध्येत पैवच ११ अपक्कं संगमायाति अतिजीर्णं तु क
र्कशं ज्ञाति घष्टं तु सोद्वेगं कलहो वांधवैः सह १२ दग्धेन दह्यते वेश्म छिद्रं युद्धविनाशिनं वा
ह्ये लक्ष्यं न लभ्येत तथैवाभ्यंतरे पि च १३ हीने तु संधिते वाणो संग्रामे भंगकारकं आक्रांते तु पु
नः क्वापि न लक्ष्यं प्राप्यते दृढं १४ गलग्रंथितलग्रंथि धनहानिकरं धनुः एभिर्दोषैर्विनिर्मु
क्तं सर्वकार्यकरं स्मृतं १५ शार्ङ्गं पुनर्धनुर्दिव्यं विष्णोः परममायुधं वितस्तिसप्तसंमानं निर्मि
तं विश्वकर्मणा १६ न स्वर्गे न च पाताले न भूमौ कस्यचित्करे तद्धनुर्वशमायाति मुक्त्वैकं पुरु
षोत्तमं १७ पौरुषेयं तु यच्छार्ङ्गं वड्डवत्सरशोभितं वितस्तिभिः सार्द्धषड्भिर्मितं सर्वार्थसाधनं
१८ प्रायो योज्यं धनुः शार्ङ्गं गजारोहाश्वसादिनां रथिनां च पदातीनां वांशं चापं प्रकीर्तितं १९

240

रा॰
१२६

इतिधनुःप्रमाणं अथगुणलक्षणानिगुणानांलक्षणंवक्ष्येयादृशंकारयेद्गुणंपट्टसूत्रोगुणः
कार्यःकनिष्ठामानसम्मितः १ धनुप्रमाणंनिःसंधिःशुद्धस्त्रिगुणतंतुभिः वर्तितःस्याद्गुणःश्ल
क्ष्णःसर्वकर्मसहोयुधि २ अभावेपट्टसूत्रस्यहारिणीस्नायुरुच्यते गुणार्थमपिवागृह्यास्ना
युर्वामहिषीगवां ३ तत्कालहतगोकर्णचर्मणांछागलेनवा निर्लोमतंतुरूपेणकुर्याद्वागुण
मुत्तमं ४ पक्ववंशत्वचःकार्योगुणस्तुस्थावरोदृढः प्राप्तेभाद्रपदेमासेत्वगर्कस्यप्रशस्यते ५
तस्मात्तत्रगुणःकार्यःपवित्रःस्थावरोदृढः हृतार्कसूत्रतंतूनांहस्तास्त्वष्टादशस्तथा तद्वृत्तंत्रि
गुणंकार्यंप्रमाणेयंगुणेस्मृतं ६ इतिगुणलक्षणानि अथशरलक्षणानिः अतःपरंप्रवक्ष्या
मिशराणांलक्षणंशुभंस्थूलंनचातिसूक्ष्मंचनपक्वंनकुभूमिजं हीनग्रंथिविदीर्णंचवर्जयेद्दी
दृशंशरं १ गतग्रंथिसुपक्वंचपांडुरंसमयाहृतं कठिनंवर्तुलंकांडंगृह्णीयात्सुप्रदेशजं द्वौ
हस्तौमुष्टिनाहीनौदैर्घ्येस्योल्पेकनिष्ठिका विधेयाःशरमानेषु पंचेष्वाकर्षिपेत्पुनः ३ काक

रामः
१२६

241

हंसशसादीनांमत्स्यादक्रौंचकेकिनां गृध्राणांकुरराणांचपक्षाएतेसुशोभनाः एकैकस्यशू
रस्यैवच्चतुः पक्षाणियोजयेत् षडंगुलप्रमाणेनपक्षछेदंचकारयेत् दशांगुलमिताःपक्षाः
शार्ङ्गचापस्यमार्गणे योज्यादृढाश्चतुःसंख्याः सन्नद्धाःस्नायुतंतुभिः शराश्चत्रिविधास्तेयाःस्त्री
पुमांश्चनपुंसकाः अग्रेतस्थूलाभवेन्नारीपश्चात्स्थूलोभवेत्पुमान् समंनपुंसकंज्ञेयंतल्लक्ष्या
र्थेप्रकाश्यते दूरपातंयुवत्याचपुरुषोभेदयेदृढं ८ अथफललक्षणं फलंतु शुद्धलोहस्यसु
धारंतीक्ष्णमक्षतं योजयेद्दृढलेपेनशरेपक्षानुमानतः १. आरामुखंक्षुरप्रंचगोपुच्छंचार्द्ध
चंद्रकं सूचीमुखंचभल्लंचवत्सदंतंद्विभल्लकं कर्णिकंकाकतुंडंचतथान्यान्यप्यनेकशः
फलानिदेशदेशेचभवंतिबहुरूपतः २ आरामुखेनवैचर्मक्षुरप्रेणचकार्मुकं सूचीमुखेन
कवचंत्वर्द्धचंद्रेणमस्तकं भल्लेनहृदयंवेध्यंद्विभल्लेनगुणःशराः लोहंचकाकतुंडेनल
क्ष्यंगोपुच्छकेनच अन्यन्ह्येपुच्छकंज्ञेयंशुद्धकाष्ठविनिर्मितं मुखेचलोहकंटेनविद्धंत्र्यंगुल

 242

साम्मितं ६ अथफलपायनं फलस्यपायनंवक्ष्येदिव्यौषधिविलेपनैः येनदुर्भेद्यवर्माणिभे
द्येपेतरुपत्रवत् पिप्पलीसैंधवंकुष्टंगोमूत्रेणतुपेषयेत् अनेनलेपयेच्छस्त्रंलिप्तंचाग्नौप्र
तापयेत् २ अतिशीतमनाविद्धंपीतंनष्टंतचौषधं ततोनिर्वापितंतैलेलोहंतत्रविशिष्यते ३
पंचभिर्लवणैः पिष्टंमधुसिक्तैः ससर्षपैः एभिःप्रलेपयेच्छस्त्रंलिप्तंचाग्नौप्रतापयेत् ४
शिखीग्रीवानुवर्णाभंतप्तंपीतंतचौषधः ततस्तद्विमलेतोयेपाययेच्छस्त्रमुत्तमं ५ इतिपाय
नविधिः अथनाराचनालीकौ सर्वलोहास्तुयेबाणानाराचास्तेप्रकीर्तिताः पंचभिःपृथुलैः
पक्षैर्युक्ताः सिद्ध्यंतिकुत्रचित् १ नालीकालघवोबाणानलयंत्रेणनोदिताः अत्युच्चदूरपा
तेषुदुर्गयुद्धेषुतेमताः २ अथस्थानमुष्टिआकर्षणलक्षणानि स्थानान्यष्टौविधेयानियो
जनेभिन्नकर्मणां मुष्टयःपंचसमाख्याताव्यायाःपंचप्रकीर्त्तिताः अग्रतोवामपादंचदक्षि
णंजानुकुंचितं आलीढंतुप्रकर्तव्यंहस्तद्वयंसविस्तरं २ प्रत्यालीढंतुकर्तव्यंसव्यंचैवा

रा० 242
२०

साम्मितं ६ अथ फलपायनं फलस्य पायनं वक्ष्ये दिव्यौषधिविलेपनैः येन दुर्भेद्य वर्माणि भेद्यंते तरुपत्रवत् पिप्पली सैंधवं कुष्ठं गोमूत्रेण तु पेषयेत् अनेन लेपयेच्छस्त्रं लिप्तं चाग्नौ प्रतापयेत् २ अतिशीतमनाविद्धं पीतं न ष्टंत योषधं ततो निर्वापितं तैले लोहं तत्र विशिष्यते ३ पंचभिर्लवणैः पिष्टैः मधुसिक्तैः ससर्षपैः एभिः प्रलेपयेच्छस्त्रं लिप्तं चाग्नौ प्रतापयेत् ४ शिखिग्रीवानुवर्णाभं तप्तं पीतं तयोषधः ततस्तु विमले तोये पाययेच्छस्त्रमुत्तमं ५ इति पायनविधिः अथ नाराचनालीकौ सर्वलोहास्तु ये बाणा नाराचास्ते प्रकीर्तिताः पंचभिः पृथुलैः पक्षैर्युक्ताः सिद्ध्यंति कुत्रचित् १ नालीका लघवो बाणा नलयंत्रेण नोदिताः अत्युच्च दूरपातेषु दुर्गयुद्धेषु ते मताः २ अथ स्थानमुष्टि आकर्षणलक्षणानि स्थानान्यष्टौ विधेयानि योजने भिन्नकर्मणां मुष्टयः पंच समाख्याता व्यायाः पंच प्रकीर्तिताः अग्रतो वामपादं च दक्षिणं जानु कुंचितं आलीढं तु प्रकर्तव्यं हस्तद्वयं सविस्तरं २ प्रत्यालीढं तु कर्तव्यं सव्यं चैवा

243

नुकुंचितं दक्षिणंतु पुरस्तद्धूरपतितविशिष्यते ३ पादौसविस्तरौकार्यौसमौहस्तप्रमाण

तः विशाखस्थानकंज्ञेयंकूटलक्ष्यस्यभेदने ४ समपादेसमौपादौनिश्चलौचसुसंगतौ अ

समेवपुरोवामेहस्तमात्रेणतंवपुः ५ आकुंचितोरूद्वौयत्रजानुभ्यांधरणींगतौ दर्दुरक्रममि

त्याहुःस्थानकंदृढभेदने ६ सव्यंजानुगतंभूमौदक्षिणंचसकुंचितं अग्रतोयत्रदातव्यंतं

विद्याद्गरुडक्रमं ७ पद्मासनंप्रसिद्धंतुउपविश्यथाक्रमं धन्विनातत्तुविज्ञेयंस्थानकंभ्र

मलक्षणं ८ अथगुणमुष्टयः पताकावज्रमुष्टिश्चसिंहकर्णीतथैवच मुत्सरीकाकतुं

डीचयोजनीयायथाक्रमं १ दीर्घातुतर्जनीयत्रआश्रितांगुष्ठमूलकं पताकासाचविज्ञेया

नलिकाहरमोक्षणे २ तर्जनीमध्यमामध्यमंगुष्ठेविशतेयदि वज्रमुष्टिस्तुसाज्ञेयास्थू

लेनाराचमोक्षणे ३ अंगुष्ठनखमूलेतुतर्जन्यग्रेसुसंस्थितं मुत्सरीसाचविज्ञेयाचित्र

लक्ष्यस्यवेधने ४ अंगुष्ठाग्रेतुतर्जन्यामुखंयत्रनिवेशितं काकतुंडीचसाज्ञेयासूक्ष्मल

लक्ष्येषुयोजिता ५ अथधनुर्मुष्टिसंधानं संधानंत्रिविधंप्रोक्तमधऊर्द्धसमंसदा योजयेत्त्रिः
प्रकारंहि कार्येष्वपियथाक्रमं १ अधश्चदूरपातित्वंसमेलक्ष्यंसुनिश्चितं दृढास्फोटंप्रकु
र्वीतऊर्द्धसंधानयोगतः २ अथछायाः कौशिकःकेशमूलेवैशरःशृंगेचसात्विकः श्रव
णेवत्सकर्णश्चग्रीवायांभरतोभवेत् १ अंशकेस्कंधनामाचछायाःपंचप्रकीर्तिताः कौशि॰
कश्चित्रयुद्धेषु अधोलक्ष्येषुसात्विकः वत्सकर्णःसवित्तेयोभरतोदृढभेदने दृढभेदेच
दूरेचस्कंधनामानमुद्दिशेत् ३ अथलक्ष्यं लक्ष्यंचतुर्विधंज्ञेयंस्थिरंचैवचलंतथा वेध
येत्त्रिप्रकारंतुस्थिरवेधीसउच्यते १ आत्मानंसुस्थिरंकृत्वालक्ष्यंचैवस्थिरंबुधः चलंतुवे
धयेयस्तु आत्मनास्थिरसंस्थितः चलंलक्ष्यंतुतत्प्रोक्तमाचार्येणसुधीमता धन्वीतुचलते
यत्रस्थिरलक्ष्येसमाहितः ~~चलंलक्ष्यंतुतत्प्रोक्तमाचार्येणसुधीमता धन्वीतुचलतेयत्रस्थि~~
~~रलक्ष्येसमाहितः~~ चलाचलंभवेत्तत्र अप्रमेयमनिंदितं ३ उभावेवचलौयत्रलक्ष्यंचा

245

६६ ब्राह्मणं भक्तिदानेन सौम्येन क्षत्रियं तथा वैश्यं शास्त्रेन दंडेन शूद्रं दंडेन वाहयेत् ६७ क्रोधिते स्खलिते भीते तथा चोन्मार्गगामिनि कुपिते भ्रांतचित्ते च षड्भु दंडं निपातयेत् ६८ क्रोधिते स्कंधमुद्दिष्टं स्खलिते जघनांतरं भीते वक्षःस्थलं हन्याद्वक्त्रं चोन्मार्गगामिनि ६९ कुपिते पुच्छसंस्थानं भ्रांतौ जानुहृदयांतरे सर्वस्य प्राप्नदद्दुस्य दंडमेकं निपातयेत् ७० अस्थाने ताडिते वाजी वहन्दोषानवाप्नुयात् तावद्भवंति ते दोषाः यावज्जीवत्य सौ हयः ७१ अवाहिता विनश्यंति सर्वकर्मक्षमा अपि कृशा व्याधिपरीतांगा जायंते त्यंतवाहनात् ७२ पंच धाराः प्रवक्ष्यामि क्रमशस्त्रिभिर्याः प्रकीर्तिताः प्रथमा विक्रमा धारा द्वितीया पुल्लका स्मृता ७३ तृतीया एणीकंठी च चतुर्थी त्वरिता स्मृता पंचमी ताडिता षष्ठी निरालंबा प्रकीर्तिता ७४ विक्रमा गतिरित्युक्ता चतुष्पादीततः स्मृता मुखपादसमायुक्ता एणीकंठी च सा भवेत् ७५ स्वेच्छया त्वरिता धारा ताडिता चैव पंचमी षष्ठी चैव तु या धारा स्वर्गलोकेषु तिष्ठति ७६ याः संख्या रोमकूपानां

श्रा॰
१२६

